ञिठावेव भवतः वैतिव्यवस्थितविभाषा तेन धत्तयथा नो रोदिः संज्ञैपेतस्य शिष्याः द
त्तरौढीयाः एवं अदनपारीणीयाः वज्रहोतीयाः वज्रकाश्यपीयाः नित्यं तु संज्ञा जिह्वकात्य संकात
यो नैभवत्यैव जैह्वकाताः हारिकाताः ॥अणुदित्स्यात्मनाभाव्योऽनपरः॥ अणुदिच १२।१२।७२
ग्रहमाणः स्वस्य ग्राहको भवति आत्मना सह भाव्यमानं तं परं च वर्जयित्वा इदमण
ग्रहणं परेण णकारेण अतः स्फादेरेवेति तत्परनिर्देशात् ज्ञापते यस्य आचरति चो-
लि; दैत्यः कौमारः अस्य चोश्च लोभवति मालौभवति ।उदित् तोश्चु नाम्बुः पुनाएुः
अभाव्य इति किं भाव्येनेउत्पाद्येन त्यादेशादित् किन्तभिनः तेस्वस्यग्राहकोभवति अस्मा न
त् त्यदादेरःटित् लविनाकित् वभूवमिन् स्रजिष्टगोरम अनपर इति किं भिनोनेण

जैनेन्द्रव्या०
२५

ध भ

रैतैः खट्वाभिरित्यत्र न भवति तकारः इकस्य सो यन्तिदि निमित्ते परग्रहणामुपार्थेतः परो यस्मा
त्तपरः तादपि परस्तपरः इदमेव ज्ञापकं सविधौ केति योगविभागोक्ति। आदेरोप् अपरेङे
प् तपरत्वादऊेइकादिषु त्रिमात्रचतुर्मात्राणां निवृत्तिः अभाव्येत पर इतिपयगभावा-
नभुद्याणां किं क्वचिद्भाव्योपि स्वं गृह्णातीति निज्ञापनार्थं अमूभ्यां सित्तास्सूत्रमिदं नप
विभाषा सादि नियमार्थी भवति न चाणुदित्तां सस्या स्वस्य च ग्रहणा प्रासंयेन स्वस्यैवेति नि-
यमः स्यात् ॥ अंत्येनेनादिः ॥ १।१।७१ ॥ अंत्येन इत्संज्ञकेन गृह्यमाण आदिस्तन्मध्यपतितानां ग्रा
हको भवत्यात्मना सह आद्यंतौ संबंधिशब्दौ अतः सामर्थ्यादाद्यंतव्यतिरेकेण तन्म
ध्यपातिवस्तु प्रत्येकं संज्ञित्वेनाक्षिप्तं अइउ इत्येतेषां प्रत्येकं अणिति संज्ञा एवं अक
अच् अट् इत्येवमादयः अंत्येनेति किं सुडित्यत्र आदिना इत्येतस्य रकारेण ग्रहणं
माभूत् अंत्येनेतीदमेव ज्ञापकं सहार्थे गम्यमानेपि भवति ॥ असंख्यकः ॥ १।१।२३ ॥ संख्या एकत्वा
दिका सा यस्य न विद्यते तदसंख्यं किं संज्ञं भवति एकत्वादिनिबंधना विभक्त्युत्पत्तिरसंख्या-

१०
२५

द्धमाप्रासुयोके रितिवचनाद्वनिके पुनरसंख्याः स्वर् अन्तर् प्रातर् सनुतर् पुनर् प्रातर्ह सायं
नक्तं अस्तं वस्तोर्दिवा दोषा ह्यः श्वः कं शं योमंयश्चनाम्नोविहायसारोदस्योर्भूर्भुवः स्वस्ति समया
निकषातराअहिरसाम्प्रत मद्धासत्यमिद्धा मुधामृषावृथामिथ्यामिथोमिथुमिथुनमन्तिरामुहुरभी
क्ष्णंमेरु ऊरि स्तुचैस् नीचैस् अवश्यं सामि साचि विष्वगन्वगानुषक् सानक् द्राक् प्रागध प्राक
स्पृयधिग्विरुग्ज्योग्मनाक्कौनैरोषज्ञोषं तूष्णींक कामे निकामे प्रकाम मारात् रवरं परंचिरंनि
रः नमः स्वयं भूयः प्रायः प्रवाहुकमार्यं हलं कलं पलं वरती वसुधुदुष्कृते सपदि सनात् सना
तनानाश्रु सहसायुगपर्व पांशुपुरा पुरतः पुरस्तात्पुरः इत्येवं प्रकाराणि संज्ञकाश्च संर्वेच वाह आ
ह एवं प्रभृतयः स्तश्वतसादयः ततइत्यादयः ञ्यर्थाः कृत्वश्च सुमाव्यमादयः क्त्वाप्याद क्त्वा
शश्चेति हस्वेनिकेचित्पठंति तच्चचिंत्यं उपाधिनकमित्यकोसंभवात् उपकुंभं मन्यनइति
सुमोदर्शनात् उपकुंभीकृत्येति ईत्वविधानाच्च सामान्यविषयाक्रिसंज्ञा विशेषविषयानिसंज्ञा
असंख्यग्रहणोकिं पत्रासंख्यत्वंप्रनोपनेनत्रक्रिसंज्ञा उच्चैः परमोच्चैः अपात्ति स्वस्ति उपसर्ज्ज

जैनेंद्र व्या०
२५

नेमाभूत अत्युच्चैः अत्युच्चैसौ अत्युच्चैसः अत्यक्षिः क्षिप्रदेशाः सुपोक्षेरित्येवमादयः ॥ गाङ्-
कुटादेरञ्णिन्ङित् ॥ गाङ् इत्येतस्मात् कुटादिभ्यश्च धुभ्यः परेऽञ्णित् तस्याः ङित्वोभवति
विनापिवतमतिदेशोगम्यते। गाङ् इति ग्याभ्यादि ङादेशोगृह्यते कुटादिस्तुदादेरंतर्गणः ना
यावत्वतशब्द इति गाङ् अध्यगीष्ट। अध्यगीषातां अध्यगीषत लुङ् ङोर्वेति इङो गाङादे
शः धुमादिस्त्रेगोत्वे कुटादि कुटिता कुटितुं कुटितव्यं पुटिता पुटितुं पुटितव्यं व्यचेरनासि
कुटादित्वं विचिता विचितुं विचितव्यं अनसीतिकिं उरुव्यचाः असमसर्वधुभ्य इत्यस अमि
दितिकिं उत्कोटयति उत्कोटो वर्त्मनिङितोव ङिद्वत् इवेनाद्दयोगम्यते तेन उच्चुकुटिषती
त्यत्राद्दुनुदात्तेतोरइतिदो न भवति ॥ ट्विज्ञः ॥ अप्रत्येनेत्यादिरित्यतः आदिरिति वर्त्तते विजे
र्होस्तरः इडादिस्यः ङिद्द्भवति । उद्विजिता उद्विजितुं उद्विजितव्यं इडितिकिं उद्वेजनं उ
द्वेजनीयं विजत्न इतिकिं लविता ॥ वोर्णोः ॥ उर्णोतेःपरः इडादिस्यः वा ङिद्भवति प्रोर्णुवि-
ता प्रोर्णविता अप्राप्तविकल्पोयं इसंज्ञकतुरुङ् इटिपरत्वान्नित्योविधिः प्रोर्णुवि अत्रा २५

ग इति

दित्येव ञिवदीर प्रोर्णोविष्यते इडादिरित्येव प्रोर्णवनं प्रोर्णवनीयं ॥ गोपित् ॥ अपित् १।२।४॥
सार्वधातुकं ङिद्भवति। कुरुतः कुर्वन्ति चिनुतः चिन्वन्ति मृष्टः मृजन्ति किं कर्त्ता मार्ष्टि। अपिदि
ति किं करोति मार्ष्टि अपिदिति प्रसज्यप्रतिषेधः यद्येवं तुदानि लिखानीत्यत्र पिदपितोरे-
कादेशः पिद्भवतीति ङ्युडः एवं प्रसज्येन नायं दोषः लोडादेशस्य पित्वं नत्वाटः अथ पर्यु
र्युदासः इह तर्हि च्यवेत प्लवेत इति परापि रुपिदपितोरेकादेशस्य पितोन्यत्वम् स्तोत्य
प्रतिषेधः प्रसज्येन नैष दोषः वर्णाश्रयत्वेनालोप इति प्रागेवैकादेशादेः ॥ असंयोगाल्लिट् कित् ॥ १।२।५॥
अपिदित्येव अक्रात्परः अपिल्लिट् किद्भवति बिभिदतुः बिभिदुः ममन्जतुः ममन्जुः
लिडिति किं यष्टा असंयोगादिति किं ममन्थतुः ममन्थुः ननु रेधिव रेधिम इत्यत्रासंयोगा हि
हितो लिट् नैवं तु द्विधा उपदेशग्रहणात् ध्वयगात् एवञ्च कुण्डा हुण्डे इत्यत्र सयोर्हल इति क्य
त्वो भवति अपिदित्येव बिभेदिथ ङिदिति वर्तमाने किद्ग्रहणं किं ईजतुः ईजुः ङिति निजि नं तुः-ईजु
स्यात् अयमेव किद्विषयः वचेल वध्वे इत्यत्र परत्वादपि कृतेस्मिन्नत्वमिति चेत् इयवाचि

जैनेन्द्रव्याकरण
२६

त्वात्परशब्दस्येत्यदोषः। अस्यादिति प्रसज्यप्रतिषेधः न चैनस्मात्त्वाहि हि न पर्युदासे हि हलं
तादेव स्यिट् किन्तु स्यात् वीर्वोरित्यनेन वेति व्यवस्थितविभाषानुवर्त्तते ततः श्रीषिषमिदं भि
क्षे जिधिभ्योऽपि किद्भवतीत्येके श्रेषतुः श्रेषुः गेपतुः गेपुः देभतुः देभुः परिषस्वजे परि
षस्वजाते समीधे समीधाते समीधिरे ॥ मृडमृदगुधकुषक्लिशवदवसः क्त्वा ॥ मृडमृदगुधकु
षवदवस इत्येतेभ्यः परः क्त्वास्यः किद्भवति मृडित्वा मृदित्वा गुधित्वा कुषित्वा उदित्वा
उषित्वा सिद्धे विधिरारभ्यमाणो नियमार्थः तुल्यजातीयस्य च नियमः सेट् क्त्वा तुल्यजा
तीयः तेन मृडादिभ्यः एव क्त्वा सेट् किद्भवति नान्येभ्यः देवित्वा सेवित्वा वर्तित्वा सेटि
ति विशेषणात् किं भुक्त्वा भुक्त्वा मृडादिभ्यः क्त्वैवा किद्भवति विपरीतो नियमो नाशंकनीयः।
एवं हि क्लिशः इति कित्ववचनमनर्थकं स्यात् प्रतिषेधाभावात् गुधिकुष्योः स्युक् डो वेह
लः सन्ध्वोर्निविकल्पे प्राप्ते नित्यार्थः पाठः ॥ क्लिशः ॥ क्लिशः परः क्त्वा सेट् किद्भवति क्लिशि-
त्वा पूर्वेणानियमेन कित्वे निवर्तिते न ध्यु डो वा हलः सन्ध्वोर्निविकल्पः प्राप्तः पूर्वसूत्रे इष्ठ

२६
३२

नोवधारणार्थं गोनर्द ॥ मुषग्रहिरुदविदः संश्च ॥ मुषग्रहिरुदविद इत्येतेभ्यः परः संश्च क्त्वा च
सेट् किद्भवति मुमुषिषति जिघृक्षति रुरुदिषति विविदिषति मुषित्वा गृहीत्वा विदित्वा ॥ ग्र
हेरिडादेर्नियमार्थं चित्त्वे विध्यर्थमितरेषां रुदो वो हलः संश्चेति विकल्पे प्राप्ते वचनं ॥ इको झल्
कः ॥ इकोऽन्तिनि वचनं अंत्येनेतादिरित्यतः झलादिरिति वर्त्तते ॥ इगन्ताद्धातोः परः झलादिः सन् कि
द्भवति । समर्थ्यात्सन्निहितस्य धातोरिकोऽन्तस्य विधिः । चिचीषति निनीषति रुरूषति चिकीर्ष
ति । तुतूर्षति यदि सन्निहितत्ववचनसामर्थ्यान्मात्रिकाद्दमात्रिकयोरभावः सिद्ध इत्यस्या
नर्थक्यं शास्त्रमपि न हि न स्यात् नीप्सतीति एतस्मिंस्तु सति चिचीषत्यादिषु सावकाशं दीर्घत्वं
परत्वाच्छास्त्रेण बाध्यते झलादिरिति किं शिशयिषते इक इति किं पिपासति सनीत्येव कर्त्ता
हलन्ताच्च ॥ सनि किक इति च वर्त्तते अंतःशब्दः समीपवचनः इकोऽन्तसमीपो योहल् तदंताद्धा
झलादिः सन्किद्भवति विभित्सति बुभुत्सते चिवत्सति अंतग्रहणं किं शिघ्म इत्यत्र निदिनि भवति ।
नात्र इक्समीपाद्धलः परः सन् एवं चास्यार्थः इकः परो हल् तस्मात् हलन्त्यव्यवधानः तस्माद्

स्वाङ्गसमुदाये स्वाङ्गत्वाभावना - अच समुदाय - अचत्वाभ्यसिद्धः इति - अजित्येव सिद्धः - एकग्रहणं व्यर्थं ... ज्ञापयति - वर्णग्रहणे जातिग्रहणमिति
तेन एतद्धर्मो अयानेकधा ... ग्रहणम् - इति यावत

इको झलादिः सन्किद्भवति अयं तत्रग्रहणार्थं अस्मिन्व्याख्याने इक इति का निर्देशः किंपि-
पक्षति शलीत्येवं विवर्द्धिषते निरेकाजनादि: स्वत्र एकग्रहणं ज्ञापकमुक्तं अन्यत्र वर्णग्रह
णे जातिग्रहणमिति तेनेह हल्ग्रहणेन भिन्ने अभिन्नाभिधानप्रत्ययनिमित्ते हल्ला निरवधे ने
तत: धिप्सतीति सिद्धं ॥ लिङ्सिचौ ॥ सन्निति निवृत्तं झलिकः हलन्तादिति च वर्त्तते सिचालिङ्
द इको हलन्तात्परौ झलादी कितौ भवतः सेरयदपरत्वं विशेषणं न लिङो संभवात् दायविलि
ङ् झलादि अभित्त अबुद्ध भित्सीष्ट भुत्सीष्ट भुत्सत द इति किं अवर्ता स्तीत् अदासीत्
कित्वे सति इट् शोरमागमो न स्यात् यदवर्जेत्यादि नैष । इक इत्येव अयष्ट यक्षीष्ट यजिः प्रमत्ये
न हलन्तादित्येव अचेष्ट चेषीष्ट एभ्यः स्यात् झलादिरित्येव अवर्तिष्ट वर्तिषीष्ट एम
स्यात् ॥ उः ॥ अत्रैर्षी व्याख्यानाद् ग्रहणं । ऋवर्णान्ताद्धोः परौ लिङ्सिचौ झलादी कितौ भ
वतः अकृत अहृत कृषीष्ट हृषीष्ट द्विमात्रस्य अतीर्ष्ट तीर्षीष्ट लिङ्सिचोरित्यनिवृत्तेश्च २५
हृग्यं झलादिरित्येव अवरिष्ट वरिषीष्ट ॥ गमेर्वा ॥ गमेर्हेः परौ लिङ्सिचौ झलादी वा

कितो भवतः। समगतेति किंत्वे अनुदात्तोपदेशेत्यादिना ङः खं। आद्धो रि निसेः खं। पक्षे समगंस्त समंग
सीष्ट संगसीष्ट॥ हनः सिः॥ हन्तेर्दोः परः सिर्ईत् किद्भवति आहत आहसातां आहसत सेः कि
त्वात् ङस्यत्वे अन्यथा अनिदित इति हलुङः खस्य प्रतिषेधः स्यात् नः सिग्रहणं लिङि ङित्त्व
र्थं दग्रहणमनुवर्त्तते नेदं चेत् नित्योपधादेशा इति इह प्रयोजनं नास्ति॥ यमः सूचने॥ यमेर्दोः
सूचनेर्थे वर्त्तमानात्परः सिर्ईत् किद्भवति सूचनं गंधनमाविष्करणमित्यर्थः। उदायत उदाय
साता। उदायसत। अकर्मकत्वे आङो यमहन इति दः सूचन इति किं आयंस्त कूपाद्र
ज्जुं सकर्मकत्वे समुदाङ्भ्यो यमोऽग्रन्थ इति दः॥ वोपयमे॥ उपयमो दारस्वीकारः उपयमेर्थे वर्त्त
मानाद्यमेर्दोः परः सिर्ईद्वा किद्भवति। उपायत कन्यां उपायंस्त कन्यां स्वीकृतवानुपाद्यम इ
तिदः इयमप्राप्ते विभाषा स्वीकारसूचने पूर्वे विप्रतिषेधेन पूर्वेण नित्यो विधिः॥ भुस्थोरिः॥
र इति वर्त्तते भुसंज्ञकानां स्था इत्येतस्य च धोः इकारोन्तादेशो भवति सेः सिश्चेत्कित् स्य
दित अधित उपास्थित प्रादित सेः खं सन्निपातपरिभाषायाः अनित्यत्वाच्च हाति लिप्सतेः

२८ उपान्मंत्रकरणेपेरितिदः इत्थवचनसामर्थ्यादेपोनित्यत्वात् सिद्धेति किन्तु हसामुत्तरार्थ
मनुवर्त्तमानेसेरपिविशेषणं विहितं ॥ नःसेट्पूङ्शीङ्स्विदिमिदिक्ष्विदिधृषोन॥ पूङ् शीङ् स्विद
मिद् क्ष्विद् धृष इत्येतेभ्यः परः तसंज्ञः सेट् नकिद्भवति पवितः पवितवान् अकः किते ६
ति इटि प्रतिषिद्धे पूङः इनिलक्षणारिङ्भाषितः शीङः पायितवान् अनुबंधोपदृवेतनि
वच्युर्थः शेश्वितः पोशितवान् गमागमिचाकाचुकोसुधिय इनियत्वे स्विदः प्रस्वेदितः शायितः
१ प्रक्ष्वेदितः प्रस्वेदितवान् प्रमेदितः प्रमेदितवान् प्रक्ष्वेदितवान् प्रधर्षितः प्रधर्षितवान् वैयात्ये
धृष इत्येवभयति पूङः नयोर्थ्येकत्वार्थो इनिकर्मणिक्तः शीङोधिगत्यर्थाच्चेति कर्त्तरिचेति
स्विदादीनां कर्त्तरिचारंभेक्त इनिकर्त्तरिक्तः आदितः इटिप्रतिषेधे वाभावारंभयोरिति प्रत्ते
भवति तइतिकिं पवित्वा पूङइनोइप क्त्वे मृडादिनियमादकित्वं सेडितिकिं पूतः पूतवा
न् ॥ मृषस्वार्थे॥ स्वार्थेतितिक्षायां मृषेर्द्धोः स्वार्थेवर्त्तमानात् तसंज्ञः सेट् नकिद्भवति मर्षितः
मर्षितवान् स्वार्थे इतिकिं अपमृषितं वाक्यमाह । धातूनामनेकार्थत्वात् स्वार्थग्रहणं पठिता

पि रूं पाठस्तूपलक्षणो सेडित्येव मृदुसहने चास्योदित्त्वान्नयस्य वेलोट् प्रतिषिद्धे मृषः ॥ वो
दुङोभावारंभयोशापः ॥ नुस्सेतान किदितिवर्त्तते उदुङोधोः शब्विकरणात्परः भावेचारंभेचक्तः
द्योति सेड्वानकिद्भवति भावग्रहणं क्तस्य विशेषणं आरंभआद्यः क्रियाक्षणः सधोर्विशेषणं द्युति
तमस्य द्योतितमस्य द्योतितमस्य संबंधेन कर्त्तव्यविवक्षायां नकिदित्यादिना प्रतिषेधः
लु लुठितमनेन लोठितमनेन प्रलुठितः प्रलोठितः प्रलुठितवान् प्रलोठितवान् कर्त्तरिचा
रंभे क्तः इतिकर्त्तरिक्तः उदुङः इतिकिं विदितमनेन प्रविदितः भावारंभयोरितिकिं रुचि
तः कार्षापणः शब्विकरणादिति गुधितमस्य प्रगुधितः श्नाविकरणोयं सेडित्येव रू
[illegible] ढमस्य प्ररूढः लपकरणमसंदेहार्थं निकुचित इति नकारस्य खकृते सन्निपातलक्षणो
विधिरनिमित्तं तद्विघातस्येत्यकुङो विकल्पो न भवति विहितविशेषणाद्वा ॥ नोडस्यफा
न्ता ॥ सेडितिवर्त्तते वेतिच नकारोङोधोः यकारान्तात् फकारान्ताच्च क्त्वा सेड्वा किद्भव
ति । श्रथित्वा श्रंथित्वा ग्रथित्वा ग्रंथित्वा गुफित्वा गुंफित्वा मृडादिनियमान्नित्यमकि[illegible]

प्राप्ते विधिर्विभाष्यते नोडः इति किं गोपित्वा न त्वत्रापि य्वुडो वा हलः संश्चेति विकल्पेन भाव्य
मेव नहि रूपे अपित्वा प्रत्युदाहरणाय फोनादिति किं श्लेसित्वा ॥वंचिलुंच्यृतस्तृषिमृषि
कृशः॥ वंचिलुंचि ऋति तृषि मृषि कृश इत्येतेभ्यः परः क्त्वा सेड्वा किद्भवति वचित्वा वंचित्वा
लुचित्वा लुंचित्वा ऋतेर्वा ईयङिति यदा ईयङ् न भवति। तदा ऋतित्वा अर्तित्वा तृषित्वा त-
र्षित्वा मृषित्वा मर्षित्वा मडादिनियमान्नित्यमकित्त्वे प्राप्ते सेडित्येव यत्क्त्वा मृष्ट्वा वोदि
त्पक्षे नेट् ॥ य्वुडो वा हलः संश्च॥ सेडिति वर्त्तते क्त्वेति च। उकारो डः इकारो डश्च यो अ
कारान्तात् हलादेः परः संश्च क्त्वा च सेटौ वा कितौ भवतः उकारेकारो डो अधजंतत्वात्स-
म्बन्धाद्वर्णग्रहणमादिविशेषणं दिद्युतिषते दिद्योतिषते द्युतिस्या प्योजिरिति वस्य जिः
द्युतित्वा द्योतित्वा लिलिखिषति लिलेखिषति लिखित्वा सन् अकिदेव क्त्वापि सेट् म
डादिनियमादकित् तयोरप्राप्ते कित्त्वमनेन विधीयमानं विकल्प्यते य्वुडः इति किं विव
र्तित्वा अयइति किं दिदेविषति देवित्वा हलादेरिति किं एषिषिषति एषित्वा सनि एपिट-

तेहित्वं मेदिन्येव बुभुक्षते भुक्त्वा॥ युक्तवद्व्यक्तिलिंगसंख्ये॥ युक्तः प्रकृत्यर्थः प्रत्ययार्थेन
संबंधात् उसोर्थउस उसियुक्तवद्व्यक्तिलिंगसंख्ये भवतः इवार्थे वा उसि तिनाशस्य संज्ञा
नयस्यत्यस्यार्थः॥ साहचर्यादुसत् तत्र उसर्थे प्रकृत्यर्थवल्लिंगसंख्ये विधीयेते लिंगस्त्रीपुंनपुंसकानि संख्या एक
त्वद्वित्वबहुत्वानि पंचालो नाम राजा तस्यापत्यं राष्ट्राद्धात्तोमित्यञ् बहुत्वे तस्यापि लुके पंचालाः क्षत्रि
याः पुल्लिंगा बहुसंख्या तेषां निवासो जनपदः तस्य निवासादूरभवाविस्यागतस्यालाः जनपदउसित्युस
न्त्रियवपुर्वलिंगसंख्ये ते जनपदेपि भवतः पंचालाः कुरवः अंगाः वंगाः कलिंगाः एवं वरणानामदूरभवं गो
दौ नाम हृदौ तयोरदूरभवः वरणादेरिति उस वरणाः खदिराः गोदौ अर्थातिदेशाद्विशेषणानामपि न
इत्याकिह्ये पंचालाः रमणीयाः बह्वन्नाः बहुक्षीरघृताः बहुमाल्यफलाः वरणाः रमणीयाः गोदौ र
मणीयौ अजानेरिति वक्तव्यं पंचाला जनपदः गोदौ ग्रामः अत्र जनपदग्रामयोर्जातित्वान्नातिदेशः
जात्यर्थो जातिः तेन तद्विशेषणानामपि प्रतिषेधः पंचाला जनपदो रमणीयः नेदं वक्तव्यं संज्ञाप्रमा
णात् यथा वर्षाः अप्सो दाराः गृहाः सिकता इत्येवमादीनां संज्ञाशब्दानां संज्ञाप्रमाणत्वादेव स्वलिंग न

लुपि युक्तवद्व्यक्तिवचने ।१।२।५१
उसि

स्वसंख्यं याच साधुत्वे एवं ज्ञाते ऽपि भविष्यति पंचालादीनां तु संज्ञाशब्दानामन्वाख्यानपरत्वान्नार्थो युक्त
लिंगसंख्यातिदेशश्च विधीयत इत्यदोषः उभौ निर्विकं आमलकं फलं उपिकृते फले ऽर्थे आ[illegible]कशब्दस्य स्त्री
लिंगं माभूत् लिंगसंख्ये इति किं बदर्यो ऽदूरभवो ग्रामः बदर्यादित्वात् तस्य वनं बदरीवनं वनस्पति
त्वातिदेशो माभूत् विभाषौषधिवनस्पतिभ्य इति णत्वं प्रसज्येत ते नित्यं व्यवस्थितविभाषानुवृत्तेः मनुष्या
र्थे उत्तिविधेः वरणानां न लिंगसंख्यातिदेशः चंचा अभिरूपः वध्रिकाः दर्शनीयः चंचेव मनुष्य इवे प्रतिकृ
तौ कन् इति कः लुपो मनुष्ये इत्युप खलतिकादिषु संख्यातिदेश एव खलतिकस्य पर्वतस्यादूरभवानि
सत्तिलिकं वनानि हरीतक्यादिषु लिंगातिदेश एव हरीतक्याः अवयवः फलं हरीतकादि त्युप हरि
तक्यः फलानि ॥ तिष्यपुनर्वस्वोर्नक्षद्वंद्वे द्वित्वं ॥ तिष्यः एकः पुनर्वसू द्वौ तेषां द्वंद्वे द्वित्वं भवति उदितौ तिष्यपुनर्वसू
तिष्यपुनर्वसू नाभिर्तौ इति किं राधानुराधाः श्रवणाधनिष्ठाः भग्रहणं किं तिष्ये जातः पुनर्वस्वोर्जातौ तत्र जा
त इत्याग्रतस्यालुकः भेभ्यो बहुलमित्युप तिष्यश्च पुनर्वसू च तिष्यपुनर्वसवो माणवकाः ननु गोत्रत्वादे
वात्र न भविष्यति पर्यायार्थं तर्हि भग्रहणं पुष्यपुनर्वसू सिध्यपुनर्वसू इति बहुवचननिर्देशः किमर्थः

एकवद्भावेमाभूत् इदंतिष्यपुनर्वसु इदमेवज्ञापकंयानक्षत्रगादिसूत्रेयोगविभागोस्ति द्वंद्वइति किं
पश्यतिष्यस्तोपुनर्वसूयेषांतेतिष्यपुनर्वसवोमाणवाः नित्यादपवादत्वविपर्ययेणाप्रणीयेत इतिभविष्य:
त्यमस्तिजात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्यामिति नवक्तव्यं सामान्यविशेषात्मकत्वाद्वस्तुनः विशे
षेष्वनुवृत्ताकारबुद्धिनिमित्तंसामान्यंव्यावृत्ताकारबुद्धिहेतवोविशेषाः तत्रसामान्यविवक्षायामेकत्वं
भवति संपन्नोव्रीहिः विशेषविवक्षायांबहुत्वंसंपन्नाव्रीहयः संख्यानुप्रयोगेजातिविवक्षैवएकोव्री
हिःसंपन्नःसुभिक्षंकरोति अस्मदोद्वयोरेकस्यचवाबहुत्वंनवक्तव्यं। कस्त्वमहंब्रवीमि आवांब्रूवः थ
वयंब्रूमः इति आत्मनइंद्रियाणांचस्वातंत्र्यंपारतंत्र्यंविवक्षाभविष्यति कदाचिदात्मास्वतंत्रोभव
ति अनेनाहंपश्यामि कदाचिदिंद्रियाणांस्वातंत्र्यमिदंमेऽक्षिपश्यति तत्रात्मनःस्वातंत्र्यविवक्षायामे
कत्वंइंद्रियाणांबहुत्वं सविशेषणस्यात्मविवक्षैव अहंदेवदत्तोब्रवीमि अहंसाधुर्ब्रवीमि युष्मदि गुरा
वुभयविवक्षायांत्वंमेगुरुः यूयंमेगुरवः एतदपिशब्दशक्तिस्वाभाव्यात् फल्गुनीप्रोष्ठपदानांनक्षत्रेद्वयो य
र्बहुत्वंवेतिनवक्तव्यं कथंकदापूर्वेफल्गुन्यौकदापूर्वाःफल्गुन्यः कदापूर्वेप्रोष्ठपदेपूर्वाःप्रोष्ठपदाः य कदा

ना

दाफल्गुनीसमीपगतेचंद्रमसिफल्गुनीशब्दोविवस्थितेतदाबहुत्वमन्यदाद्वित्वं ॥ स्वाभाविकत्वादभि

धानस्यैकशेषारंभः ॥ स्वभावतएवशब्दः एकशेषमनपेक्ष्य एकत्वबहुत्वेषुवर्तते अनएकशेषानारंभः

३१ एकत्वादीनामकृत्सुपान्नानां अभिव्यक्तये विभक्त्युपादानं यथा एकोद्वौबहवः पंच

सप्तेति एवंवृक्षः वृक्षौ वृक्षाः अथमन्यसे शब्दनिवेशात् नैकेनानेकस्याभिधानं तत्रानेकार्था

भिधाने अनेकशब्दत्वप्रसक्तमतएकशेषः अत्रोच्यते यदभिन्नेष्वभिन्नाभिधानप्रत्ययहेतुर्जा

तिः शब्दार्थः तस्याः प्रत्यायनेएकएवशब्दः समर्थः अथद्रव्यंशब्दार्थः तत्रानेकंप्रत्यर्थाभिधानबु

द्धिलिंगंतस्याभिधित्सायामनेकशब्दत्वमासेएकशेषइति एतदप्ययुक्तं अवर्णशेषःवृक्षोनिवृत्तस्य

शब्दस्यपदार्थमभिधत्तेतदाद्वित्वेपिवर्तेतेतिकिमेकशेषेण अथनाभिधत्तेतदापश्चादपिसएवा

र्थः कथमनेकार्थप्रत्ययः सरूपाणांद्वंद्वनिवृत्त्यर्थमेकशेष इत्यपिनास्त्यनभिधानात् नहिभवति द्वौच

द्वौचद्वे इति अथविरूपशब्दार्थएकशेषः तथाहि द्वौपूनानत्र रूपाश्चदेवविशेषः अथपत्यमेतद्धि

तेवद्धएवकारोभिन्नक्रमः विशेषोवैरूप्यंवृद्धः शिष्यते यूना सहवचनेवृद्धयुवलक्षणाएवयदिवि-

श्र

शेषः समानायामाकृतौ गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ दाक्षिश्च दाक्षायणश्च दाक्षी वृद्ध इति किं औपगव
श्चानंतरः औपगविश्च युवा औपगवौपगवी गार्गिगार्ग्यायणौ यूनेति किं गर्गश्च गार्ग्यश्च गर्गगार्ग्यौ तल्ल
क्षण एवेति किं गार्ग्यवात्स्यायनौ अत्र प्रकृतिविशेषोप्यस्ति एवकारः किमर्थः भागवित्तिर्भागवित्तिको भागवित्तिरप थिता
त्यं युवा दोषवत् सौवीरेषु माप इत्यत्र रूपस्यापि भावात् न तल्लक्षण एव विशेष इति किं वेदश्च वैदश्च
युवा वैदवैदौ तल्लक्षणो वैरूप्याभावात् इह तु भवत्येव स्त्रीपुंवच्च स्त्री वृद्धा यूना सहवचने शिष्यते पुंव
द्भावश्चास्या भवति तल्लक्षण एव यदि विशेषः गार्गी च गार्ग्यायणश्च गार्ग्यौ दाक्षी च दाक्षायणश्च
दाक्षी नेदं ह्रस्वं कर्तव्यं जीवनिवंश्ये वृद्धे इदमभिधत्ते अजीवति वृद्धयूनोर्द्वयोर्नास्त्यनभिधानात्
जीवनिवंश्ये वृद्धे स्त्रीपुंयाने च सामान्येन वृद्धयाश्चाभिधत्ते द्वंद्वस्य चानभिधाने यदपि पुमान्
स्त्रिया सहवचने शिष्यते तल्लक्षण एव यदि विशेषः कठश्च कठी च कठौ मयूरश्च मयूरी च मयूरौ
प्राणिधर्मयोः स्त्रीपुंसयोर्ग्रहणादिह न भवति नद नदी पती। घटघटी शरावोदंचनादिनस्तल्लक्षणाद्
न्येव कुक्कुट मयूर्यौ एवकार इत्येव इंद्रेंद्राण्यौ भवभवान्यौ पुंयोगलक्षणोपत्यविशेषः इदमपि जाति

१।-

जैनेन्द्रव्या. मातृविरूपाभिधानेति द्वंद्वस्य चानभिधाने अभिधाने द्वंद्वोऽस्ति नदनदीपतिः भ्रातासगाचस्वसौ भ्रातस्वसा
१४ रौ भ्रातृपुत्रौ स्वसृदुहितृभ्यां शिष्येतोऽइतिन वक्तव्यं कथं भ्राता च स्वसा च भगिनी वा भ्रातरौ पुत्र
श्च दुहिता च पुत्रौ ~~[illegible]~~ विरूपा द्वंद्वानभिधाने च इदं तर्हि वक्तव्यं नपुंसकमनपुंसकेनैक
वच्चास्यान्यतरस्याम् तल्लक्षणश्चेद्यदि विशेष इति शुक्लं च वस्त्रं शुक्लश्च कंबलः शुक्ला च साटी तदिदं
शुक्लादि शुक्लं तानीमानि नेदं न्याय्यं क्लिंगु लिंगेषु नपुंसकस्य शब्दो प्राधान्यात् तेन सामान्यविशेषापेक्षया
श्वशुरः श्वश्र्वा वचनभेदः पिता मात्रा श्वशुरः श्वश्र्वाऽन्यतरस्यामित्यपि न वक्तव्यं सामान्यविवरूपापि तरौ श्वशुरौ
विति द्वंद्वाऽप्यस्ति मातापितरौ श्वश्रूश्वशुरौ श्वश्रूशब्दः स्त्रियामिहैव निपातितः त्यदादीनि सर्वैर्नित्यं
सर्वैरिति त्यदादिभिरन्यैश्च सहवचने त्यदादीनि शिष्यन्त इत्येतदपि नास्ति त्यदादीनामन्यापेक्षरू
उ पा सामान्यवाचित्वं त्यदादिषु च यच्च परं तत्तत् सामान्यवाचीति तत्प्रयोगोऽपुत्रः स च देवदत्तश्च तौ
कश्च देवदत्तश्च कौ स च यश्च यौ अपात्रकस्य लिंगमच स्थाली च कुंडं च स च देवदत्ता च स च देवदत्तौ च
स च कुंडं चेति उच्यते द्वंद्वापवादोयं द्वंद्वे चान्यलिंगं न्याय्यापि न दयपुकं इदं वापि न वाच्यं ग्राम्यप-

१५

ष्वसंघेष्वतरुणेषु स्त्री ग्राम्यपशवः तेषां संघेषु स्त्री शिष्यते अतरुणाश्चेद्ग्राम्यपशवः गावश्च स्त्रियः
गावश्च पुमांसः गाव इमाः अजा इमाः ग्राम्यग्रहणं किं रुरव इमे पृषता इमे पशुग्रहणं
किं ब्राह्मणा इमे संघेष्विति किं एतौ गावौ चरतः अतरुणेष्विति किं वत्सा इमे बर्करा इमे कथं नेदं वक्ष्यते
गमयिष्यं लोकाश्रयत्वात्तु लिङ्गस्येति अन्यथा अश्वा इमे इत्येवमादिषु एकशेषेषु अनियतस्त्रीलिङ्गप्र
सज्येत ॥ ॥ इत्यभयनन्दिविरचितायां महावृत्तौ प्रथमस्याध्यायस्य प्रथमः पादः समाप्तः ॥ ॥
ॐ नमो वीतरागाय ॥ ॥ भूवादयो धुः ॥ भू इत्येवमादयः शब्दाः प्रत्येकं धुसंज्ञा भवन्ति भू एध स्पर्द्ध इ
त्यादि धोरित्यधिकृत्य लडादिविधिः कार्यं भवति एधते स्पर्द्धते आदिशब्दो व्यवस्थावाची तेन न आ
णापयत्यादीनां निरासः "अर्थपदोपलक्षितानां च व्यवस्था" ततो धुसमानशब्दानां याचामादि त्वेवमा
दीनां सर्वनामविकल्पप्रतिषेधस्वरादिवाचिनामग्रहणं "भूशब्दस्यादिरेषां मितिवसेभ्यादय इति
प्राप्नोति नैवं भूवादीनां वकारो मंगलार्थः प्रयुज्यते इकोयणिति व्यवधानमेकया मिति स्मरतेः
तेन त्रिमंबकं यजामहे वायु वस्वरयोरित्यादि सिद्धं भुवो वार्थं वदन्तीति भवने संपदादिपाठा

सि॰ ६

रूप् भुवंभवनंक्रियांवदंतीतिबहुलवचनाद्रावंतादपिवदेरोगादिके इत्निकतेभ्वादयः अस्मिन्प

११ रेशिष्टप्रयोगाद्दाशापयत्यादीनांलेपः अर्थाधाचादयःस्मृताः अथवावागतिगंधनयोरित्यस्म

त्परअमादिपाठ्भुवोवादयः वाच्यवाचकभावसंबंधेन अर्थइत्यर्थः ॥ येतुचकारोमंगलार्थं इतिपठं

तितइदंवाच्याः यथाधिकाहृकारोमंगलमितिप्रसंगःस्यात् एतेनचननुज्ञानंमन्युक्तंमंगलाभिधेय

श्चवकारोनाममालादिषुनपठ्यतेयत्तौमध्यनिपातश्चचिंत्यः धुमंदेशाः धोर्पाङ्कपामभिरार

इत्येवमादयः ॥ अकर्मकाद्धेः ॥ १२।३।३ ॥ अकर्मकोधुर्धिसंज्ञोभवति कर्त्राप्यमित्यादिनालकृशोनविहितं

कर्मनदविवक्षितंवास्याकर्मकः धिसंदेशाः अशौदृ इत्येवमादयः। कार्यार्थोप्रयोगीत् १२।३।३ शास्त्रेअस्य

स्यकार्यार्थमाश्रीयतेप्रयोगेचनश्रूयतेयः सइत्संज्ञोभवति अइउण् णाकारः त्रिमिदास्तेइने टुनदि

समृद्धौ डुकृञ्करणाइत्यादिषुत्रिटुडवः ।डे. डस्यादिषुडकारः कार्यार्थंइतीतिं कुलात्खः कुलीनः प

मकुलीनइत्यत्रखकारस्याप्रयोगित्वात् ख्वित्वेसुमचइतिसुमममज्येत अप्रयोगीतिकिं परमकुलीनः

ईनादेशः कार्यमितिमुमस्यात् ननुकार्यार्थोप्रयोगीत्सवः कथंनेत्संज्ञः उभयविशेषणोपादानात् । अ

१०

न्यस्य कार्यार्थी भक्त्या यो प्रयोगी स्यदोषः । अनर्थाश्च यमिकेशाश्रितग्रहणीनत्पतीतीत् तेन तस्य लोपः

इति न वक्तव्यं प्रयोगानुसारेण प्रयोगित्वावगतेः प्रतिपत्तिगौरवमिति चेत् उपदेशेऽजनुनासिक इदिति

अनुनासिकत्वमपि प्रयोगादेवावसेयम् इति समाने इत्यदेशाः टिराहिति स्येवमादयः यथासंख्यमनुदेशः समा- 1/3/10

नां समाः शिष्यमाणा भवन्ति । यथासंख्यं यावद्यथार्थं सादयप इति हमः समास्तुल्याः तुल्यत्वं चाद्य

मतः पूर्वोद्दिष्टानामनुद्दिष्टाः समास्तेषां मिथः स्यात् समोऽन्तेऽन्तो प्रथमसंख्यस्यापि यः प्रथमसंख्यो इ

त्येवमादियोज्यं समा इति किं संघातकन्तरुणाघोषैः अभिभामणा संघाद्वयश्चत्वारो यं: अश्मादय

स्त्रयः वैषम्यात् संघादिषु चतुर्षु वैषम्यात् यथासंख्यं न भवति तथा यन्नेतादिकं तच्च समशब्दस्य सर्वार्थे तु

ल्यार्थे च सर्वनामसंज्ञोक्ता न तुल्यार्थे ॥ स्वरितेनाधिकारः 1/3/11 स्वरितेन लिङ्गेनाधिकारो वेदितव्यः । त्यः प

रः आम्भद इत्येवमादिः स्वरित इति आचार्यप्रतिज्ञापालिङ्गं यामिश्च: स्वरित इत्यस्याचोधर्मत्वेन तेषे

त्येवमादिषु हल्त्वसंभवादग्रहणं अधिकारो विनियोगो व्यापार इत्यर्थः स्वरितेन नियोगविभागात् य-

थासंख्यमपि स्वरितेन ज्ञेयं ॥ अनुदात्तङितः 1/3/12 ङकारेण अनुदात्तेन च धातोः इत्यघ भवति ङितः शूङ् सेव

(margin: यथासंख्यमनुदेशः; यथासंज्ञो; वैषम्य; ये; आने; = ज्ञे)

१४ शीङ् पोतेइड् अधीते अनुदात्तेतः आस आस्ते वस वस्ते चक् आचष्टे च चक्षिङ् इकरणमनर्थकम् अनु
दात्तेत्वाद्धुर्विव कृताः तः कर्मणि च भावे च ये विनिधो लकारा विहिताः तद्द्वारेण द्विविधा सविधौ च मात्रेण
स्व नित्यमोर्यं इनुदात्तेभ्यो एव भवति द[illegible] इनियमः सोन्येभ्योपि प्राप्तः ततो मामिति हितायो नियमः।
यत्रमेव दृश्य प्राप्नोति नन्व समनत्व भवति यदित्यनियमः स्यात् इनुदात्तेन एव दोषमिति मान्येभ्यः तदान्य
नमस्यामि इत्यादि मामितिरूप मनर्थकं स्यात् तदा रभादिष्वात्मपरस्मैपदं किं चान्यनियमे हि इनुदा
त्तेतोपि प्राप्नोति न चित्रत्वेषत्वेषोषामामिति शेषम् अहणां कुर्यात् तदकरणं च ज्ञापकं अकृतिनियमस्य॥
दि ड्रा ॥भिनिभावकर्मणोः भेदाः ड्रो एव भवति भावे आस्यते भवता सुप्यते भवता भावस्यैकत्वे युष्मद
लेख्य: स्मदर्थसंभवस्त्वकारस्य: प्रयत्भूतो धात्वर्थः स्वप्रधानको भावः इतिजीवत्समानेदइत्यच्चानेदोवाहो: कर्मकर्तरि
एतेः कर्तृत्वेन विवक्षित इति दो न भवति कर्मणि क्रियते कटः लूयते केदारः भिद्यते कुशूलः स्वयमेव अर्थात्
यमोपरस्तु कर्तर्यपि प्राप्तः समभित्यनेन नियमेन निवर्त्यते यदि ड्रा एव दो भवतीति नित्यनियमः स्यात् भाव
कर्मणोरनियत्वान्नोपि प्राप्ते तच्चित्रत्यर्थं शेषकर्तरि समित्युच्यते शेषाः करणं ज्ञापकं अर्थ्यमस्य कर्थं प्रकृति नि

१।३।१४॥

नियमेचसतिमभिस्यत्रकर्त्रभिप्रहाणेशेषग्रहणंचप्रत्याख्यानं॥ कर्त्तरिकर्म॥ कर्त्तरिआत्मनेपदंभवतिकर्मव्य
तिहारेऽइतिओविहिताः तत्सहचरितंः कर्मव्यतिहारोआर्थः कर्मव्यतिहारश्चकर्मग्रहणसामर्थ्यात्क्रि
अ याव्यतिहारः कर्मस्यकर्तुमिष्टोक्रियायदान्यःकरोतिनदिशोचेनस्तदाक्रियाव्यतिहारः व्यतिलुनीते
व्यतिपुनीते आरंभसामर्थ्यात्कर्त्तेर्यवसिद्धे कर्त्तृग्रहणमुत्तरार्थं नगतिहिंसार्थेभ्यइतिकर्त्तरिक
र्मव्यतिहारेविहितस्यदस्यप्रतिषेधोयथास्यादिहमाभूत् व्यतिभवतेसेनया व्यतिगम्यतेग्रामाःव्य
तिहन्यतेतदस्यवः क्रियाव्यतिहारइतिकिं पारिभाषिककर्मव्यतिहारेमाभूत देवदत्तस्यधान्यंव्यति
लुनीते॥ १।३।१५ नगतिहिंसार्थेभ्यः॥ गत्यर्थेभ्यः हिंसार्थेभ्यश्चधातुभ्यःआत्मनेपदंनभवति व्यतिगच्छंति
व्यतिधावंति हिंसार्थेभ्यः व्यतिहिंसंति व्यतिभिंदंति व्यतिछिंदंति व्यतिपिषंति बहुवचननिर्दे
शोहसादिसंग्रहणार्थः व्यतिहसंति व्यतिजल्पंति व्यतिपठंति व्यतिकर्षयंति हवस्तोरप्रतिषेधो
वक्तव्यः संप्रहरंतेराजानः व्यतिवहंतेनद्यः। गतिहिंसयोःप्रतिषेधोगतिहिंसाहेतौनभवति व्यतिग
मयंते व्यतिभेदयंते॥ परस्परान्योन्येतरेतरे॥ १।३।१६ परस्परअन्योन्यइतरेतरइत्येषूपपदेषुआत्मनेपदंनभव-

११ ति परस्परस्य व्यतिलुनंति अन्योन्यस्य व्यतिलुनंति इतरेतरस्य व्यतिलुनंति व्यतिभ्यां योगे नित्ये पि कर्म
व्यतिहारे परस्परादिपदप्रयोगः द्वाष्यपूर्णो भद्रूपेनियथा परस्परादिभ्यो द्वानां कथं सिद्धिः द्विलप्रकरणे क
र्मव्यतिहारे सर्वनाम्नो द्विर्वचनं बहुलमिति वक्ष्यति ॥ नेर्विशः ॥ निशब्दस्य रूपस्य ग्रहणं न निसंज्ञा
याः निपूर्वाद्विशः देभवति निविशते निविविशेते निविशते लावस्थायामडागमस्तद्भक्तो न व्यवधायकः [१ष्ट]
न्यविशत मम्मितिमंयाप्र सनिर्देशः समर्थार्थः सामर्थ्यं च योगे नानेन इह न भवति मधुनि विशंति भ्रमराः
अनर्थकत्वाद्वा ॥ परिव्यवेभ्यः क्रियः ॥ परि वि अव इत्येवंपूर्वात् क्रीणातेः देभवति परिक्रीणीते विक्री
[अवक्रीणीते] णीते अवक्रीणीते पत्ययपरले विधिरयं अनर्थकत्वादिह न भवति उपक्रीणाति गांयि क्रीणाति अपचावक्री [रि]
णीयः क्री इति अनुकरणं अनुकार्येणार्थवत्वात् सति स्वादिविधिः प्रकृतिवदनुकरणमिति धु
त्वानि देशादेशादेशः उत्तरत्र जेरिति निर्देशान् तत्करणापि तथाश्रयापि फचिदेप ॥ विपराभ्यां जेः ॥ [दृ]
वि परा इत्येवंपूर्वाज्जयतेर्दे भवति विजयते पराजयते अत्रापि सनिर्देशः समर्थस्य ग्रहणार्थः
तेनेह न भवति बहुविजयति वनं पराजयति सेना ॥ आङो दोऽनास्यविहरणे ॥ व्यादसनं विकसनं विवरणं वा ।

अन्येषांदारुणांव्यसनेशक्तिर्नास्ति आङ्पूर्वाद्ददातेः अव्यसनेपदंभवति विद्यामादत्ते अयं क-
र्त्रभिप्राय[illegible]फलेप्राप्तार्थमिदं अव्यसनमितिकिं आस्यंव्याददाति पिलकंव्याददाति विपादिकां
व्याददाति स्वांगकर्मकादितिवक्तव्यं इहमाभूत् व्याददतेपिपीलिकापतंगमुखं पचकर्त्रभिप्रायफले
प्राप्तस्याव्यसनइतिप्रतिषेधः कर्त्रभिप्रायफलेव्यसनेदः प्राप्नोति नैवं अव्यसन इतियोगविभागात् येनके
नचित्प्राप्तस्यप्रतिषेधः आङि निङि एकरणंकिं आददात्यसौभिस्थाभिमिदानीमहमस्मार्थं आङि
तियोगविभागःतेनस्थः प्रतिज्ञानेदोभवति अनित्यंशब्दमातिष्ठते गमयतेःकालहरणोपागमयस्व ना
वदेवदत्त ॥ गुप्तिज्किभ्यांच। अनुतिष्ठगालः आपृच्छते गुरुमितिसिद्धं। क्रीडोनुपर्याङः। १।३।२१॥ अनुपरिआ-
ङ्इत्येवंपूर्वात्क्रीडोदोभवति अनुक्रीडतेपरिक्रीडते आक्रीडते गिसाहचर्यादिनोगिरेवमनुहरणादि
हनभवति माणवकमनुक्रीडति माणवकेनसहेत्यर्थः कार्थइत्यनुनायोगद्रुष् गितिसंज्ञाप्रतिषेधश्चवि शि-
क्षेर्जिज्ञासायांपदंवक्तव्यः शाकेःसनंतस्येदंग्रहणं विद्यासुशिक्षते धनुषिशिक्षते कर्मविवक्षायांविद्याः
शिक्षतेचके। हरतेर्गतिताच्छील्ये। पैतृकमश्वा अनुहरन्ते मातृकंगावः मातुरागतंऋतनधर्मानिहरण गा-

३८ तिलाकोऽत्य इतिकिं मातरमनुहरंति प्राप्तउपलंभन इतिचवक्तव्यं वाचाशरीरस्पर्शनमुपलंभोदेवदत्तायशप
ते उपलंभन इतिकिं प्रापति ॥समोकूजे॥ संपूर्वात्क्रीडः अकूजनेर्थे दोभवति संक्रीडते संक्रीडते अकूजइति
किं संक्रीडंति शकटानि अव्यक्तंशब्दंकुर्वंतीत्यर्थः ।समवप्रविभ्यस्थः। अवप्रविसमइत्येवंपूर्वात्स्थाधातोस्तिष्ठते
र्दोभवति अवतिष्ठते वि. निष्ठते प्रतिष्ठते संतिष्ठते ॥ज्ञीप्सास्थेयोक्तौ॥ परपरितोषार्थंआत्मरूपादिप्र
काशनं ज्ञीप्सास्थेयोपेते आश्रितोनिर्णायकरूपेणेतिस्थेयः । बहुलवचनादधिकरणोयः ज्ञीप्सायांस्थेयो
क्तौचतिष्ठतेर्दोभवति।ज्ञीप्सायां तिष्ठतेकन्याछात्रेभ्यः तिष्ठतेब्राह्मणीछात्रेभ्यः स्वाभिप्रायप्रकाश
नेनात्मानंरोचयतीत्यर्थः ज्ञीप्सनक्रियायाकर्मव्यपदेशाभावात् छात्राणामुपपन्नासंप्रदानत्वं स्थेयोक्तौ
देवदत्तेतिष्ठते त्वयितिष्ठतेमयितिष्ठतेसंशयान्निर्णयंकरोतीत्यर्थः ॥उदईहे॥ उत्पूर्वात्तिष्ठतेरीह
र्थेवर्त्तमानाद्दोभवति गेहेउत्तिष्ठते धर्मेउत्तिष्ठते घटतइत्यर्थः ईहइतिकिं अस्माद्ग्रामाच्छतमु
त्तिष्ठति उत्पद्यत इत्यर्थः ईहइति ईहतेः पर्यायग्रहणात् गम्यमानायामीहायांनभवति आसना
दुत्तिष्ठति उत्तिष्ठतिसेना अस्माद्ग्रामाद्वृष्टिः पंचपुरुषा उत्तिष्ठंति ॥उपान्मंत्रकरणे॥ उपपूर्वा

तिष्ठतेर्मैत्रकरणे दो भवति जगत्या उपतिष्ठते नखभा उपतिष्ठते मैत्रकरणादिति किं भर्तारमुपतिष्ठ
ति भार्या यौवनेन उपादिति योगविभागः तेन देवपूजासंगतकरणमित्रकरणपथिषु दो भवति देवपूजा
यां सीमंधरमुपतिष्ठते संगतकरणे रथिकानुपतिष्ठते मित्रकरणे महामात्रा उपतिष्ठते संगतकरण
मुपश्लेषः मित्रकरणं मानसः संबन्धः पथि अयं पन्थाः स्रुघ्नमुपतिष्ठते वा लिप्सायामिति वक्तव्यं भि रवि
क्षुको दातृकुलमुपतिष्ठते उपतिष्ठति वा ॥ २५ ॥ अकर्मकाधिरिति । उपपूर्वात्तिष्ठतेर्दो भवति या
वद्भुक्तमुपतिष्ठते यावदोदनमुपतिष्ठते भोजने भोजने उदरे उदरे उदरीभवतीत्यर्थः धीशनादिकसा
मिनमुपतिष्ठति ॥ उत्तपः । धेरिति वर्तते विडरित्येवं पूर्वात्तपतेर्दो भवति वितपते उत्तपते ज्वल व
तीत्यर्थः ॥ धेरित्येव ॥ उत्तपति सुवर्णं सुवर्णकारः वितपति पृथिवीमादित्यः दहतीत्यर्थः । धु रइ
ति किं नितपति दोपयतेत्यर्थः स्वांगकर्मकाच्चेति वक्तव्यं वितपते पाणिं उत्तपते पाणिं आत्मनेपदं संयो
गेन पारिभाषिकं तेनेह न भवति वितपति परपाणिं उत्तपति देवदत्तो यज्ञदत्तस्य पृष्ठं ॥ आङो यमहनः
आङ्पूर्वाभ्यां यमहन इत्येताभ्यां धिभ्यां दो भवति । आयच्छते दीर्घी भवतीत्यर्थः । आहते आघ्ना

१० ते आघ्नते यमः कर्त्राभिप्रेते समुदाङ्भ्यो यमेः इति दः सिद्धोऽन्यथेदं धेरित्येव आयच्छति रज्जुमा-
हंति पाणिं स्वांगकर्मकाच्चेति वक्तव्यं आयच्छते पाणिं । आहन्त्येव कुः स्वांगादीनि किं परकीयांगक
र्मकाभावेन आहंति शिरः परकीयं ॥ समो गम्यृच्छिप्रच्छिस्वृच्छिश्रुविदृशः ॥ धेरिति वर्त्तते संपूर्वेभ्यः ग-
म्प्रच्छि स्वृ ऋच्छि श्रु विद् दृश् इत्येतेभ्यो दो भवति संगच्छते संपृच्छते संस्वरते ऋ इति ऋच्छतेः इ-
यर्त्तेश्च ग्रहणं समृच्छते समियृते समरिष्यते ऋच्छतेरनादेशस्य ग्रहणं मादेशस्य ऋग्रहणेनेति
द्ध्वान् समृच्छिष्यते संशृणुते विदेरादादिकस्य ग्रहणं शवद्भिः साहचर्यात् संवित्ते संपश्यते धे-
रित्येव संगच्छति सुहृदं संवेत्ति धर्मं गेरस्येत् स्त्रोर्वेति वक्तव्यं निरस्यते निरस्यति समूहते समूहति
॥ निसमुपविभ्यो ह्वः ॥ पुनः संग्रहणाद्धेरिति निवृत्तं नि सं वि उप इत्येवं पूर्वात् ह्वयतेर्दो भवति निह्वयते
संह्वयते विह्वयते उपह्वयते ह्वयति आत्वेन विकृत निर्देशोऽपि प्रकृतिग्रहणं नञ्योऽलिटीति निर्दे-
शात् ॥ आङ्स्पर्द्धे ॥ स्पर्द्धः पराभिभवेच्छा आङः पूर्वात् ह्वयतेः स्पर्द्धविषये दो भवति । मल्लो म-
ल्लमाह्वयते पात्रस्यात्र माह्वयते स्पर्द्धया ह्वानं करोतीत्यर्थः ॥ स्पर्द्ध इति किं गामाह्वयति ॥ गंधना

१।२।१२॥

वक्षेपसेवान्यायप्रतियत्नकथोपयोगेकृञः॥ गंधनं सूचनं अवक्षेपो भर्त्सनं सेवासेव्यः अविधि
नाप्रवृत्तिरन्यायः अविद्यमानाज्ञौनैविद्यमानसंस्कारो वा प्रतियत्नः प्रबंधेन कथनं प्रकथा उपयोगो धर्मादि
निमित्तोव्ययः ॥ गंधनादिष्वर्थेषु वर्त्तमानात्कृञः दो भवति गंधने उत्कुरुते अपममिसूचयतीत्यर्थः ॥ अ
वक्षेपे श्येनो वर्त्तिकामुपकुरुते भर्त्सयतीत्यर्थः सेवायां गणकानुपकुरुते सेवत इत्यर्थः अन्याये परदा
रानुपकुरुते अन्यायमनपेक्ष्य तेषु प्रवर्त्तत इत्यर्थः प्रतियत्ने एधोदकस्योपस्कुरुते प्रतियत्नेकृञ इतिसु
मेधिता उपास्कृतिपत्नधैकरुते इत्यादिनासुट् प्रकथायां जनापवादान्प्रकुरुते उपयोगे शतं प्रकुरुते
धर्मार्थं विनियुंक्त इत्यर्थः एतेष्विति किं कटं करोति अत्राविः करोतीत्यत्र आविः शब्द एव गंधने वर्त्त
ते न करोतिः अपकारप्रयुक्तं वा सूचनं गंधनमित्यदोषः ॥ प्रसहनेधेः॥ १।२।२२॥ प्रसहनमभिभवः अधिपूर्वात्कृ
ञः प्रसहनेर्थे दो भवति शत्रूनधिकुरुते वादिनोधिकुरुते अभिभवतीत्यर्थः प्रसहन इति किं
अधिकरोति अकर्त्रभिप्रायेफलेऽपि भवति ॥ शब्दकर्मणो वेः॥ १।२।२०॥ कर्मकर्त्रभिप्राये विपूर्वात्करोतेः शब्दक
र्मकाद्दो भवति । ध्वांक्षो विकुरुते स्वरान् क्रोष्टा विकुरुते स्वरान् शब्दकर्मण इति किं विकरोति कटं।

३८ शब्दग्रहणेनशब्द विशेषाः स्वरादयो गृह्यन्ते तेनेह न भवति विकरोति शब्दं विकरोत्यनुवाको विकरोत्य
ध्यायमसावह्वा ॥वेः॥ विपूर्वात्करोतेरर्थे दो भवति विकुर्वते सैंधवाः साधुदान्ताः ओदनस्य पूर्णाश्छा
त्राः विकुर्वते। स्वार्थे योगे उपसंख्यानमिति करोति॥ सम्मानोत्संजनोपनयन ज्ञान भृति गणन
व्ययेषु नियः॥ सम्मानः पूजनं उत्संजनमुत्क्षेपः उपनयनमाचार्यकरणं ज्ञानमवगमः भृतिर्वेत
नादानं ऋणाशुल्कादिनिर्यातनं गणनं व्ययो धर्मादिष्वर्थविनियोगः सम्मानादिषु यथासंभवं वि
शेषणेषु नयतेर्दो भवति सम्माने नयते चार्वी स्याद्वादे चार्वी बुद्धिस्तद्योगादाचार्योपि तयोक्तः
पितेयेषु प्रतिपादनेन सम्मानं करोतीत्यर्थः उत्संजने बालकमुदानयते उत्क्षिपतीत्यर्थः उपनय
ने माणवकमुपनयते। आत्मनः शिष्यभावेन माणवकं प्रापयतीत्यर्थः ज्ञाने नयते चार्वी तत्त्वार्थे
तत्त्वपदार्थान्निश्चिनोतीत्यर्थः भृतौ कर्मकराननुपनयते वेतनादानेन पुष्णातीत्यर्थः गणने मद्रकाः
कारं विनयते निर्यातयतीत्यर्थः व्यये शतं विनयते सहस्रं विनयते एतेष्विति किं अजां नयति ग्रा
मं ॥कर्तृस्थे चकर्मण्यमूर्त्तौ॥ नयतेः कर्तृस्थेकर्मवाच्यः क्रोधाद्यात्मिकामूर्त्तिः कर्तृस्थेकर्मणि मूर्त्तिवर्जि

नेसमनिनयतेदोभवति क्रोधं विनयते हर्षं विनयते श्रमं विनयते शामयतीत्यर्थः अत्रकर्तृस्थत्वात्
मेणाः कर्त्राप्यफलतोनन कर्त्रापेक्रियाफलेसिद्धेपि देनियमार्थमेतत् कर्तृस्थ इति किं देवदत्तो जिनद
त्तस्य क्रोधं विनयति कर्मणी ति किं बुद्ध्या विनयति अमूर्त्ते इति किं गडुं विनयति ॥ किरतेर्हर्षजीवि
काकुलायकरणेषु ॥ किरतेर्दोभवति हर्षजीविकाकुलायकरणेष्वर्थेषु गम्यमानेषु हर्षेऽपस्किरते
वृषभो हृष्टः जीविकामपस्किरते कुक्कुटो भक्ष्यार्थी कुलायो निवासः। कुलायकरणे अपस्किरते
श्वा आश्रयार्थी चतुष्पाच्छकुनिष्वपादृष्टादाविति सुट् ॥ वृत्तिसर्गतायनेषु क्रमः॥ वृत्तिरविघातः॥
सर्गउत्साहः तायनं स्फीतभावः इत्यादिष्वर्थेषु वर्तमानात् क्रमेर्दोभवति वृत्तौ नयेष्वस्य क्रम
ते बुद्धिः न प्रतिहन्यत इत्यर्थः सर्गे क्रमते ऽध्ययनाय उत्सहत इत्यर्थः तायने ऽस्मिन्
ता द्वैन्ध्वाशास्त्राणि क्रमंते नप्रंत इत्यर्थः एतेष्विति किं क्रामति क्रमोमइति दीर्घत्वं॥ परोपात्॥ वृत्ति
सर्गतायन इति वर्तते। न परोप इत्येव पूर्वान्न क्रमेर्दो भवति पराक्रमते उपक्रमते सिद्धे सत्यारंभो
नियमार्थः परोपाभ्यामेव नान्यस्माद्वैन्यनुक्रामति इत्यादिष्विति येव पराक्रामति उपक्रामति। ज्योति-

अ रुद्गतावाडः। आङ्पूर्वात्क्रमेः ज्योतिषामुद्गमनेऽर्थे दो भवति। क्रमते सूर्यः आक्रमते चंद्रमाः आक्र-
उ मंते ज्योतींषि ज्योतिरुद्गताविति किं आक्रामति धूमो हर्म्यतलं आक्रामति माणवकः कुलपोमि-
त्यत्रोद्गतिरपि नास्ति॥ वेः स्वार्थे॥ स्वार्थः पादविक्षेपः विपूर्वात्क्रमेः स्वार्थे दो भवति सुष्ठु विक्र-
मते साधु विक्रमते विक्रमणाम श्वादीनां शिक्षाविशेषाद्गतिविशेषः स्वार्थ इति किं विक्रामत्यजिन- क्ष
संधिः स्फुटतीत्यर्थः॥ प्रोपारंभे॥ आरंभः प्रथमं कर्म। प्रपूर्वात्क्रमेः आरंभे दो भवति। प्रक्रमते
भोक्तुं प्रोपादित्यतः उपादित्ति वर्तते उपक्रमते भोक्तुमित्यर्थः आरंभ इति किं पूर्वेद्युः प्रक्राम-
ति अपरेद्युरुपक्रामति पूर्वस्मिन्नहनि पदं नेन गतं तदपरस्मिन्नागच्छतीत्यर्थः। वागेः। अपरात्क्रमेः
वा दो भवति। क्रमते क्रामति। इयमप्राप्ते विभाषा उत्स्यादिषु पूर्वेण नित्यो विधिः। अगेरिति किं सं- म
क्रामति॥ ज्ञोपह्नवे। अपह्नवोऽपलापः। अपह्नवे ज्ञानातेर्दो भवति शतमपजानीते सहस्रमप-
पजानीते। अपह्नव इति किं न त्वं किंचिदपि जानासि॥ धेः॥ जानातेर्द्वे दो भवति सर्पिषो जानी-
ते सर्पिषा दधो वा पापनेन संप्रवर्तत इत्यर्थः सोऽस्यार्थकर्ता इति करणेना अकर्त्राप्ये फले इदं द-

विधाने धे रितिकिं स्वरेण पुत्रं जानाति॥ संप्रतेरस्मृतौ॥ स्मृतेराध्यानं चिंतनं वा। संप्रतिपूर्वो ज्ञाना
तेरस्मृत्यर्थे दो भवति। शतं संजानीते शतं प्रतिजानीते अस्मृताविति किं मातुः संजानाति पितुः संजा
नाति स्मर्यंदयेक्षो कर्मणीति ता। दीप्त्युपोक्तिज्ञानेहविमत्युपमंत्रणे वदः॥ दीप्तिः प्रकाशनं उपेत्यो
क्तिः उपोक्तिः उपसांत्वनमित्यर्थः ज्ञानं परार्थावगमः ईहा यत्नः नानामतिर्विमतिः उपमंत्रणं रह
स्यनुकूलनं दीप्त्यादिष्वर्थेषु वदते दो भवति। दीप्तौ वदते चार्वी लोकायते दीप्यमाना वदतीत्यर्थः। उ
पोक्तौ कर्मकरानुपवदते उपेत्य संभाषत इत्यर्थः ज्ञाने वदते चार्वी चंद्रोदये जानाति वदितुमित्यर्थः
।ईहे। कस्मिन् रूढे वदते कामयत इत्यर्थः। विमतौ गेहे विवदंते गोत्रे विवदंते विचित्रं भाषंत इत्य
र्थः उपमंत्रणे कुलभार्यामुपवदते परदारानुपवदते अनुकूलयतीत्यर्थः एतेष्विति किं वदति देवद
त्तः॥ व्यक्तवाक्समुक्तौ॥ व्यक्तवाचो व्यक्तवर्णात्मानुष्यादयः प्रसिद्धाः प्रसिद्धाः संभूयवचनं समु
क्तिः व्यक्तवाचां समुक्तौ गम्यमानायां वदते दो भवति। संप्रवदंते ग्राम्याः संप्रवदंते साधवः। संभू
य भाषंत इत्यर्थः व्यक्तवागिति किं संप्रवदंति कुक्कुटाः समुक्ताविति किं देवदत्तो वदति जिनदत्तं।

४० माद्ध्ये पुनरर्थे यावेति किं । पूर्वमुक्तमनुवदति व्यक्तवाक्प्रयुक्तावित्येव अनुवदति वीणाः ।। विप्र-
वादे ।। विप्रवादो विप्रलापः तद्वचनेमानाद्वदतेर्दो भवति विप्रवदन्ते सांवत्सराः विप्रवदति सां-
वत्सराः विप्रवदन्ते वादिनः विप्रवदति वादिनः युगपद्विरुद्धं वदन्तीत्यर्थः व्यक्तवाग्ग्रहणम-
नुवर्तते ततो व्यक्तवाक्प्रयुक्ताविति नित्ये प्राप्ते विकल्पः विप्राद इति किं संप्रवदन्ते माधवः । व्य-
क्तवाचामित्येव संप्रवदन्ति शकुनयः । समुक्तावित्येव संप्रवदन्ति वादिनः क्रमेण ।। अवाद्ग्रः । अव
पूर्वाद्गिरतेर्दो भवति अवगिरते अपगिरते शरौ निरच पूर्वस्य प्रयोगो नास्ति अवादिति किं गिर
ति निगिरति ।। समः प्रतिज्ञाने ।। प्रतिज्ञानमभ्युपगमः प्रतिज्ञाने संपूर्वाद्गिरतेर्दो भवति अने
कात्मकं वस्तु संगिरते शब्दं संगिरते प्रतिज्ञान इति किं संगिरति ।। उच्चराधः । उत्पूर्वाच्चरतेर्ध-
र्दो भवति गुरुवचनमुच्चरते उत्क्रम्य चरतीत्यर्थः अधेरिति किं धूम उच्चरति ऊर्ध्वं गच्छतीत्यर्थः ।
समोभ्यां । संपूर्वाच्चरतेस्तृतीयायोगे दो भवति रथेन संचरते अश्वेन संचरते भीतप्रयुक्ते दो भव-
ति ननु गम्यमाने भाषुक्तादिति किं उभौ लोकान् संचरति जिनधर्मः अत्रात्मनेति करणांग- २६

म्यमानं दारा व्यवसायेदवयेः । शिष्टव्यवहारे इति वक्तव्यं । संपूर्वो दाराः भार्या भवति । सा चेदर्थः । भा इदमेव ज्ञा
पकं अशिष्टव्यवहारे भार्यापि भवतीति दास्या संप्रयच्छते । वृषल्या संप्रयच्छते कामुकः । सम इति सेवं धेनानेन
प्रशब्देन व्यवधाने ऽपि न भवति । अग्रुषप् इति किं । पाणिना संप्रयच्छति । नेदं वक्तव्यं । कर्मव्यतिहारे दः महार्ये
वधा इय्या ॥ स्वीकरणे उपाद्यमः ॥ पाणिग्रहणमविरोधो वा स्वीकरणे । उपपूर्वोद्यमः स्वीकरणे वर्त्तते
भवति । कन्यामुपयच्छते । भार्यामुपयच्छते ॥ स्वीकरणे इति किं । परभार्यामुपयच्छति ॥ ज्ञाश्रुस्मृदृशां सनः ॥
ज्ञा श्रु स्मृ दृश इत्येतेभ्यो सन्नन्तेभ्य आत्मनेपदं भवति । शुश्रूषते शास्त्रं । सुस्मूर्षते पूर्वं । दिदृक्षते देवं । ज्ञा इति पाणिभ्याम कर्मका
न्तस्यापि समो गम्यृच्छि प्रच्छि स्वरत्यर्तिश्रुविदिभ्यः । तत्र सनः पूर्ववदित्येवं सिद्धं । सकर्मकार्थमिदं । अनेन
मात्मनेपदविधानं ॥ नानोर्ज्ञः ॥ जानातेस्सन्नन्तान्नात्मनेपदं भवति जिज्ञासते धर्म्मं ज्ञोपहुवे धा संयतेरस्मृतावितिजाना
तेर्दो विहितः । तस्या कर्त्रभिप्राय क्रियाफले इति स्यात् पूर्ववत्सनः इति दः सिद्धः । तते ऽन्यत्रेदं वचनं ॥ नानोः ॥ अनुपू
र्वाज्जानातेः सन्नन्तादो न भवति पुत्रमनुजिज्ञासति भन्युमनुजिज्ञासति । सकर्मकादिति वक्तव्यमिह मा
भूत् अनुजिज्ञासते मनसा न वक्तव्यं पूर्वेण प्राप्तस्यायं प्रतिषेधः । पूर्वेण प्राप्तस्यायं प्रतिषेधः । पूर्वेणाप

८२ सकर्मकादेव सनेतादो विहितः। धेक्कुसनः पूर्वं यदिति दः अनो विति किं पुत्रं त्तिकामते॥ अस्याक्रुवः नेति
वाम्रेन प्रतिज्ञाइ इत्येवं पूर्वात् स्वरांतेः सनंतादो न भवति प्रतिज्ञुस्य वति आ आत्मु अपनिशाकं अस्य
इशः सन इति प्रास्तस्यानेन प्रतिषेधः सनिर्देशः समर्थार्थः सामर्थ्यं च धातोर्गमनाले नेह न प्रतिषेधः देवद
त्तेशोतिश्रुश्रूषते॥ नेतिनिरवग्रमसंभवात् गतिमित्रभतः श्रादिरूपचारात्ः एदे गोविषयादो भवति
शीयते शीयेत शीयते याचादिनाशीयादेशः गादिति किं शास्पीति अपात्स्यत शिक्षात्सति सडोनुदु
डोघ्यः॥ शिषते लुंड्‌डोर्गपरायदो भवति। असटतामपीच। अधिधिषातृ इ उरि नि सिसि उ डो कित्वं गपरा
नवत्व पिप्रिपते श्रिपर्णीडि ग्लिङ् शादीति रिडादेशाः॥ दि त्वादेव दोसिद्धनियमार्थमिदमन्यत्र दो न भव
ति। भविष्यति अमारिष्यत् पमार्। सनःपूर्ववत्। पूर्वेणातुल्यं वर्तते इति पूर्ववत् पूर्वत्वे च प्रत्यामते सनः पू
र्वोयेधुः न हेरे हुं सनः पूर्वोयधुः न देत्सने न दे भवति येभ्यो धुभ्यः ये न विशेषणेन दो विहितः तेभ्यः
सनधिकेभ्योपि दो भवतीत्यर्थः अपाडुत्तरादेता द इति श्रोते आत्मनेपदं सनंतादपि विधात्यिपते आति सिय
ते शिविशेषणेन निविशः निविशते निर्विविक्षते अपविशेषणं गंधनादिना उत्कुर्वे कुरुते अप यमि मं

उद्विकीर्षते उभयप्रयोगेग्रहणाद्योनिरूढत्वाद्वा आक्रमते आचिक्रंसते दोर्दीर्घात् क्रमरतौ प्रतिषेधः कारक
विशेषणात् लोपहृदेवधः सर्पिषो जानीते सर्पिषो जिज्ञासते इट्जुगुप्सते मीमांसते इति गुपुसूकलेरव
यवस्यानुदात्तेत्करणात् तेन न समुदायस्य विशेषणं भिनत्ति सिद्धः यद्येवं गोपायत्यादावपि स्यात् कर्तृगामि
त्वात् पूर्ववदिति किंविशात् सति सुमरणे आत्मनेपदनिमित्तं नास्ति आम्वनेत्कृञः आम्प्रत्ययाद्ग्रहणात् यस्मादा
म् विहितस्तस्य ग्रहणमामि इव आम्वत् तस्य कृञ् यस्मादाम् तस्येव यथा तत्कृञोऽदो वेदितव्यः ईहां च
क्रे ईहांचक्रे लिटि परतः सर्वेविज्ञादेरित्याम् आमइति परस्योप तस्य कृञ्प्रत्यान्तस्तेऽनिस्यादि विधिः सुप
कारिति तस्योप लिट्कृञोऽनुप्रयोगस्य करोतेरनेनदः विधिनियमश्चाश्रेयते पूर्ववदिति वर्तते तत्प्रक
त्यर्थेफले पूर्ववद्द्वा भवतीति विधिः । फलाभावे फले आम्वदेव वा भवति तेन दाहेस्येवामेनस्य प्रयोगे
भवतीति नियमादिह न भवति ऊदुंभोचकार ननु ग्रहणे किं आमेनानुप्रयोगस्य ग्रहणं यथा स्यादिह माभू
त् ईहते करोतीति किम् ग्रहणं किमर्थं करोतेरेव यथा स्यादिह माभूत् ईहांमास ईहांबभूव इह कृञ् ग्र
हणादन्यनिरासार्थेन ज्ञापनेन लिट्कृञोऽनुप्रयोगप्रत्याहारग्रहणात् कृञ्वलिपोग इत्यतआरभ्याकृञो

द्वितीयेनिभकारेण ॥ युजेरयज्ञपात्रेषु ॥ अकर्त्रीयफलार्थोपमारंभः युजेर्णो प्रयो देभवत्यः यज्ञपात्रेषु
प्रयुंक्ते वियुंक्ते नियुंक्ते। अयज्ञपात्र इति किं द्वंद्वं यज्ञपात्राणि प्रयुनक्ति। गैरितेति किं युनक्ति युज्जसमाधि
त्वस्यानुदात्तेत्वादत्र हणं। उदः॥ उत्पूर्वोपकजेर यज्ञपात्रे देभवति॥ उद्युंक्ते नियमोयं हलेनेपूद ए
व नान्यस्मात् निर्युनक्ति दुर्युनक्ति। संक्ष्णोः॥ सपूर्वात् क्ष्णुवः देभवति संक्ष्णुते संक्ष्णुवाते संक्ष्णुव
ते शस्त्रं ॥ भुजोऽनवने॥ शास्त्रकार्यस्यानभवाददाचित्यर्थं ग्रहणं भुजेरघपेव ह्रेमानाद्देभवति भुंक्ते भुंजा
ते भुंजते अघपातैर्भावानैदात्रिकस्य भुजेरग्रहणं निभुजति पाणिं अन्वविति किं भुनक्ति वसुधांभ
रतः पालयतीत्यर्थः। णेभीस्म्यो हेतुभये रूपताभ्यां भीस्मि इत्येताभ्यां हेतुभयेर्थे देभवति। तथेत्राजकोह
तु रिति हेतुः। तस्य भयं तद्धाद्वे नभाववसाधनेनकारौ भिभिति वसः। भय ग्रहणोनाद्विस्मयोपि हेतुरूप्यते।
मुंडोभीषयते ईतः पुङ्ग्यामिति शुक्। मुंडो विस्मापयते जटिलो विस्मापयते हित्वड इत्यालं हेतुभ
यइति किं कुंचिरूपेन भीषयति वाचा विस्मापयति अकर्त्रभिप्रायार्थौ या मारंभः। वंचनेगृधिवंचेः॥
तो रितिवर्त्तते॥ वंचने विसंवादने गृधिवंचि इत्येताभ्यां रूपताभ्यां वंचनेर्थे देभवति मारणवकं गृद्धय

ने माणवकं वंचयते विसंवादयतीत्यर्थः । वंच न इति किं । श्वानं शङ्कयति काकं स्फोटयतीत्यर्थः ।

अहिं वंचयति गमयतीत्यर्थः । लियो धातोः सम्मानने च ।। णेरिति वर्त्तते तथार्थे मधात्वे शालीनी

करणे सम्मानने पूजने लिनाते लीयते श्वापेनाद्धातोः सम्मानने योवंचने च वसे मानाद्दोभवति अ

धात्वे । क्षेनाव लिका मपलापयते अभिभवतीत्यर्थः ।। सम्मानने जटाभिरालापयते हैनौभा आत्मा

नं पूजयतीत्यर्थः । वंचने च ।। कस्त्वामुल्लापयते प्ररूम्भयतीत्यर्थः । विघाटिपोरिति व्यवस्थितविभा

षा । अनूयताल एघुडिबुनित्यमाते अधात्वर्थादिष्टिति किं बालकमुल्लापयति । कृञो मिथ्यायोगेभ्या

से ।। णेरिति वर्त्तते अभ्यासोगुणनिका करोतेः स्थेला । मिथ्या शब्दयोगे अभ्यासेर्थे दोभवति पदं मिथ्या

कारयते स्थूलं मिथ्याकारयते सदोषं पुनः पुनरुच्चारयतीत्यर्थः । कृञ इति किं पदं मिथ्या वाचयति ।

मिथ्यायोग इति किं स्तोत्रं सुष्ठुकारयति अभ्यास इति किं सकृत्पदं मिथ्याकारयति एकवारमुच्चा

रयतीत्यर्थः ।। स्वरितञितः कर्त्रभिप्राये क्रियाफले ।। णेरिति निवृत्तमुत्तरत्र शीघ्र इति निर्देशात् । ञितः स्व

रितेतश्चधातोः आत्मनेपदं भवति कर्त्तारमाप्नोति चेत् क्रियायाः फलं । फलं सर्वक्रियाणां भवतीति साम-

४२ र्थात् क्रियालभ्यते फलस्य ग्रहणं मुख्यफलपरिग्रहार्थं ञितः। सुनीते लुनीते कुरुते स्वरितेतः प-
चते यजते वपते मुख्यं क्रियाफलमत्र कर्त्तारं प्राप्नोति कर्त्रभिप्राये फल इति किं पचंती भक्ताः। वपंति
भृतकाः नात्र मुख्यं फलं किं तु भृतिरानुषंगिकं चाफलं अस्वरितेतः इति किं याति याति। वदोपात्।
अपपूर्वात् वदतेर्दो भवति कर्त्रभिप्राये फले एकांतं वादं अपवदते कर्त्रभिप्राय फल इत्येव अपवदति। इ-
तः प्रभृति कर्त्रभिप्राये फले दो वेदितव्यः॥ समुदाङ्भ्यो यमोऽग्रंथे॥ ॥समुदाङ् इत्येवं पूर्वात् यमस्तं म
थविषये दो भवति व्रीहीन् संयच्छते। आत्मनस्यैवं द्वौ हयौ भवति। भारमुद्यच्छते पारमायच्छते अग्रं
थ इति किं उद्यच्छति चिकित्सां वैद्यः। चिकित्सा ति वैद्यकग्रंथः। कर्त्रभिप्राय इत्येव संयच्छति उद्यच्छति
आयच्छति परस्य वस्त्रं आङो यमहन इत्यनेन नदो विधानमुक्तं॥ ज्ञो॥ ज्ञानातेरनुपसर्गपूर्वाद्दो भव ग्नि
ति कर्त्रभिप्राये फले। गां जानीते अश्वं जानीते अन्यत्र इति किं स्वर्गलोकं प्रजानाति कर्त्रभिप्राय फल इत्येव
परस्य गां जानाति। णिचः॥ णिजंताद्दो भवति कर्त्रभिप्राये फले कटं कारयते ओदनं पाचयते लूनेः स्व
रितेत्करणात् ज्ञापते हेतुमति यो णिच् तस्य ग्रहणमिदं कर्त्रभिप्राय फल इत्येव परस्य कटं कारयति॥ पादप्रा-

ङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः ॥ णिचश्चेति वृत्ते न पादमि आङ्यम आङ्यस परिमुह रुचि नृत
धेट् वद वस इत्येतेभ्यो ण्यन्तेभ्यः कर्त्रभिप्राये फले तङ् न भवति । पाययते । दमयते । आयामयते । यमोऽपरि
वेषण इति मित्संज्ञाप्रतिषेधान्मित्त्वं न भवति । आयासयते । परिमोहयते । रोचयते । नर्तयते । धापयते । वादयते ।
वासयते । पाधेटोरपर्यत्वान्न निवृत्तिश्चल्यर्थेत्वात् चल्पग्रघो दि निमं मात्रं मन्ये वामवतो धेः प्राणा
देकादिति लललआरंभः ॥ वा क्यषः ॥ वा गीति नेदं पाशि भा वि कु स्यार्थे पाठ वा गित्यस्य ग्रहणं किं
न ईर्ष्या वा कृदः परो न रमित्यर्थः वा वा गाम्ये कर्त्रभिप्रायफले वा तङ् भवति । स्वधान्यं पुनाति वाङ्ग्रियो गोनित्यं
देया मे विकल्पोऽयं ॥ नियमोऽयं द्युस्मान्म द्ध्वमा मेत्ति न स्मात् स्मेवभयति पूर्वेण प्रकारेण नाम
कृतिनियमः कृतः इत्युत्वनियम इत्यु भय मासि रक्ति मानि वाति मोदिवाति आक्रामति घूमः । डौदर
वभवनो त्यर्थे नियमो व्याख्यातः । ततः कर्तरि मंदुरथ्य । यदि वा कर्तरि भिन्ने इत्यतः कर्तरि निवर्तते नेह नभ
त । तम्यते । रम्यते रम्यते । परानुकृञः । पराभ्यनु इत्येवं पूर्वो कृञो मं भवति । गंधनादिषु दः तदपवाद
य । पराकरोति । अनुकरोति कर्त्रभिप्रायफले ममेव भवति । कस्मान्न नियमः । तत्र पूर्वो विधिरस्तु नियमो वा

त्स्वित्यपूर्वे एव विधिर्भवति॥ प्रत्यभ्यतिक्षिपः प्रति अभि अति इत्येवं पूर्वात्क्षिपः मंभवति प्रतिक्षिप
ति अभिक्षिपति अतिक्षिपति स्वरितेत्वात् प्राप्तः। एतेभ्य इति किं आक्षिपते॥ प्रवहः॥ प्रपूर्वाद्वहेः
कर्त्रापयफले मंभवति प्रवहति प्रवहतः प्रवहंति॥ परेर्मृषः। परिपूर्वान्मृष्यतेर्मंभवति परिमृष्यति
परिमृष्यतः परिमृष्यंति वहमपि केचिद् अनुवर्तयंति परिवहति परेरिति किं मृष्यते परीषहान्साधुः।
॥व्याङ्परमः॥ वि आङ् इत्येवं पूर्वाद्रमेर्मंभवति विरमति अनुदात्तेत्वात् प्राप्तः। एतेभ्य इति
किं रमते अभिरमते। उपात्॥ उपपूर्वाद्रमेर्मंभवति भार्यामुपरमति य यम्योग उत्तरार्थः॥ वा॥
उपपूर्वाद्रमेर्वा मंभवति। यावद्भुक्तमुपरमति उपरमते निवर्तत इत्यर्थः। विरिरंसतीत्यत्र पूर्वस्य
द निमित्ताभावात्सनः पूर्ववदिति न भवति॥ बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः॥ कर्त्रापयफले णिच इ
तिदेशात्तेभ्य समारंभः। बुध युध नश जन इङ् प्रु द्रु स्रु इत्येतेभ्यो ण्यंतेभ्यो मंभवति। ये त्वाकर्मकाः
तेषामणौ चेः प्राणिकर्तृकादिनिमित्तेभ्य प्राणिकर्तृकाणां ग्रहणं चलत्यादीनामचलत्यर्थं। बोध
यति पद्मं योधयति काष्ठानि नाशयति पापं जनयति पापं जनयति सुखं अध्यापयति शास्त्रं। प्राव-

यति ग्रामं प्रापयतीत्यर्थः । द्रावयति लोहं विलापयतीत्यर्थः । आवयति तैलं स्यंदयतीत्यर्थः । चस्पद
योन् ॥ शोरिति वर्त्तते चलेरर्थः कंपनं अदेर्योऽभ्यवहारः चलनार्थेभ्यो ऽदनार्थेभ्यश्च धुभ्यः । ण्यंते
भ्यो ऽमै भवति चलनार्थेभ्यः चलयति चोपयति कंपयति कंपने चलिरिति मित् संज्ञायां मादेशः अदनार्थे
भ्यः निगारयति भोजयति आशयति सर्वथा द्युर्थकार्यमदेर्नेष्यते आदयते देवदत्तेन इह पपउ-
पयो जयते देवदत्तेनेति भक्षणार्थो भावान्मो न भवति सकर्मकार्थमप्राप्ताणि कर्तृकार्थं च सूत्रं ॥ अ-
णौ धेः प्राणिकर्तृकात् ॥ अणौ यां सावस्थायां यो धुर्ह्रः प्राणिकर्तृकस्तस्माण्ण्यंतान्मै भवति । आस्ते
देवदत्तः आसयति देवदत्तं यो देवदत्तः शाययति देवदत्तं अणाविति किं चेतयमानं प्रयोज-
[चित संचेतने, चुरादिः] यति चेतयते ननु चिति इत्यत्र हेतुमणि चोऽत्र हणौ ज्यारथ्याते । अणाविति तस्यायं प्रतिषेधः । ते
नात्मैभवैत्येव चेतयतीति इदं नाहि यत्तु दा हरणमारोहयमाणं प्रयोजयति आरोहयते ।
अथवा अणाविति धोर्विशेषणं अणौ यो धिः तस्य उदाहरणं यथा स्यात् । अन्यथा चित्युदाहरणं
न विशेषणेऽइहैवमं स्यात् चेतयमानं प्रयोजयति चेतयति । आसयत्यादौ न स्यात् धोरिति किं ।

कद्दुं कुर्वाणो भयो जनयति कारयते भापि । कर्त्तृकादिति किं घृष्टं तिभीष्मयः । भीषयति भीहोनान
पः । प्रायेणो पधियच्छेभ्योयपवे चेति रूपमिन्दैं धादिरूपाद्धातोर्वनस्पतिकायाः प्रातिग्न
हतोननश्लेते ॥ क्यषो वा ॥ क्यषंताद्दात्मनेभवति वावचनसामर्थ्यात् स्वरेदोपि भवति । अपटत्स्वटड्
यति परपटायति परपटायते । अव्यक्तानुकरणादनेकाचोनितौ डाजिति डाच् । डाचीति द्वित्वं मोडा
चिनित्यमिति तकारस्य परस्वत्वे दिवं डाज्लोहितात्क्यषि निपतण् । एवं अलोहितो लोहितो भवति ।
लोहितायति लोहितायते ॥ द्युद्भ्यो लुङि ॥ रूपूर्पर्ये ना द्युतादयः ये त्तिबत्तांते । द्युतादिभ्यो वामे भव
ति लुङि परतः व्यद्युतत् व्यद्योतिष्ट । अलुठत् अलोठिष्ट । मविधिपरेद्युत्सु पादि रित्वत्त्विदा स्मेर्नेम
इत्यङ् । यद्यपि मे श्रद्धिधानसामर्थ्यान्माचिधि लब्धः तथाप्यनुदात्तेत्कारणात्लुङोऽन्यत्रसावकाशमिति
नित्यं मस्यादिति विकल्पार्थं वचनं । लुङीति किं । द्योतते । द्युता सहचरिता इतरेपि तथा संनद्धाति बहुव
चननिर्देशः ॥ स्मसनोर्वृद्भ्यः ॥ द्युतादिष्वंतर्भूता वृतादयः वृतादिभ्यो वा मे भवति स्मसनि च सति । वर्त्स्य
ति अवर्त्स्यत विवृत्सति वर्तिष्यते अवर्तिष्यत विवर्तिषते । एवं वध् स्यध स्मेदू इत्येते पंच्याः सप्तधे ।

न वृतादेरिनीड्प्रतिषेधः। लुटि च क्लृपः॥ क्लृपेर्लुटि च स्यसनोश्च वा परस्मैपदं भवति कल्प्ता। कल्प्तारौ। कल्प्तारः। क
ल्प्स्यति अकल्प्स्यत् चिक्लृप्सति कल्पितारौ। कल्पितारः कल्पिष्यते अकल्पिष्यत चिकल्पिषते। क्लृपेर्वृ
तादित्वादेव स्यसनोर्विकल्पे सिद्धे चकारेणानुकर्षणार्थमसंदेहार्थं क्लृप इति लत्वं किमर्थं ऋकारस्थस्य रे
फभागस्यैव रेफग्रहणेन ग्रहणं यथा स्यात् क्लृप्तः क्लृप्तवान् मातृणां पितृणां ऋलृवर्णत्वं च सिद्धं। स्पर्द्धे परं।
स्पर्द्धे परं कार्यं भवति द्वयोः प्रसंगयोरन्यार्थयोरेकस्मिन् युगपदुपनिपाते संघर्षः स्पर्द्धः यञ्यतो दोः
सुपि चेत्यस्यावकाशः देवाभ्यां वृक्षाभ्यां बहो झल्येदित्यस्यावकाशः देवेषु वृक्षेषु इहोभयं प्राप्नोति
देवेभ्य इति सूत्रविन्यासे परमेत्वं भवति अपरक्षे पर्याये वा प्राप्तिवचनं कालसंज्ञापरिभाषमिति। या
वतिकापीति तावद्यासूत्रस्य भेदा इति विधिर्नियमश्चेदं सूत्रं। यत्र परस्मिन्कार्ये कृते पुनः प्रसंगो वि
हतानां पूर्वं तत्र विधिः यत्र परमेव कार्यं दृश्यते सकृद्गते परनिर्णये बाधितो बाधित एवेति तत्र नियमः।
तद्यथा। ह्रित्यस्यावकाशः येभिद्यते जेरवकाशः चिनोति येषां चय्यन इति परत्वा कृते पुनः प्रसंगाद्गु
णं जसिवास्तोः धिरित्यस्यावकाशः कुण्डानि ङेः सुरेरमित्यस्यावकाशः पूर्वराजानः इहयूपे गुरुकुलो

नीति परत्वाभावः अतुल्यबलयोः स्पर्द्धो न भवति। उत्सर्गादपवादः परनित्यविचारणे भवेन्नित्यंनि
त्यादन्तरंगं तस्मादप्यनवकाशः। यत्र कार्ययोरपि नास्ति विरोधः। घोर्विहितात् लुब्धादपः पर्यायेण
भवंति। नद्याश्च न्यासम् नपाहिंस्विषयाध्यो भवति। आकडाराधिकारपरिसमाप्तेरित्येषोधिकारो वेदित
व्यः। लोके संज्ञासमावेशो दृष्टः। इंद्रः शक्रः पुरंदर इति। शास्त्रेपि तु यः कृद्बहु इतिशेषा योग एवेत्यवधार
णात् ज्ञापयति इहापि संज्ञासमावेशः स्यादिति यत्नः क्रियते यत्र तत्र समावेश इष्यते तत्र चशब्दोपादा
नमस्ति यथापरश्चैकाप्रथ इति वक्ष्यति प्रोषिवश्चिछिदिभिदः स्फोटः शिशिरभिन्नं नपानि दीर्घा
धिसंज्ञा सु संज्ञयावाध्यते समावेशे हि अननकून अरत्नदित्यत्र गौ कत्यनखे सन्चादि निकत्य रेधौ
परतः सन्वद्भावः प्रसज्येत। अवविग्राजदित्यत्र धिर्दीर्घत्वं स्यात्। नोविति किं वाभ्रव्यः एखुलिंगाग्रसंज्ञा
पुल्लिंगपाभसंज्ञया न वाध्यते॥ यूस्त्र्याख्यौ नदी॥ स्त्रियमाचक्षाते स्त्र्याख्यौ ईदूतौ इति नियमाद् प्राप्तः
सुपीति योगविभागात् यावी कारौ काररूपौ स्त्र्याख्यौ तदंतं धातुरूपं सुसंज्ञं भवति सुम्मिदं तं पदांमिस्व
ज्ञान ग्रहणमन्यत्र संज्ञाविधौ तदंतविधिप्रतिषेधार्थमिहनाश्रीयते आनीसु वेति नियमार्

भात् यूविति परगादेशाद्ईकारो द्विमात्रः तत्साहचर्यादीकारो द्विमात्रः। ईकारः कुमारी गौरी लक्ष्मीः। ऊ
कारः ब्रह्मबंधूः धामोरूः यवागूः। आमोरित्यादि मुसंज्ञाकार्यं यूविति किं मात्रे दुहित्रे स्वस्याविति
किं हे ग्रामणीः हे खलपूः नेयोस्त्रियमेवाचक्षाते आख्याग्रहणं किं शब्दार्थस्त्रीत्वे यथास्यात् पदान्त
रगम्यमाभूत् ग्रामण्ये स्त्रियै खलप्वे स्त्रियै उभयलिंगानामिच्छसानि मभूतीनां शब्दार्थस्य स्त्रीत्वा
ऽर्थे इच्छसमेव स्त्रियै तथागुणशब्दानां पट्वै स्त्रियै इदं च आख्याग्रहणस्य प्रयोजनं कुमारीमिवात्मान
माचरति आचारे सर्वप्रातिपदिकेभ्यः क्विब्वेति क्विप् कुमार्यै देवदत्ताय लक्ष्मीमतिक्रान्ताय अतिलक्ष्म्यै प्रा
गेव मुसंज्ञाय ज्ञानरेतान्मुकार्यं भवति इह त्वमनि कुमारये देवताया। मादेशोरू ते अप्रमानत्वियधावि
तिमतिवधान्मुकार्यं न भवति॥ स्त्री॥ स्त्रीशब्दश्च मुसंज्ञो भवति। आमी यूवोः। वा डिति प्रश्नेनित्य
मविकल्पयोः सामान्येन पुरस्तादयमपवादः हे स्त्रि स्त्रीणां स्त्रियै। मादेशानुडागमाडागमाः सिद्धाः। आ
मीयुवोः। आमिपरत इयुवोः स्थानिनौ यौ ख्याख्यौ मुसंज्ञौ भवतः सिद्धे सत्यारंभो नियमार्थः आम्येव
मुसंज्ञा नान्यत्र हे भ्रूः हे भ्रूः इयूवोरिति किम् प्रध्यै। वर्षाभ्वै॥ वा॥ वाक्षमुसंज्ञा भवनोत्यामी युवोः श्री

णां स्त्रियां भ्रूणां भ्रुवां। ङिति ह्रस्वश्च॥ य्वोर्यः स्त्र्याख्यः। इयुवोः स्थानिनौ यौ ह्रस्वौ तेषां ङिति वा सुसंज्ञा भव
ति। कृत्यै कृतये धेन्वै धेनवे पदे स्वस्थानि सुसंज्ञा सोर्ङिति नेत्येव। इयुवौ श्रियै श्रिये भ्रुवै भ्रुवे स्त्र्याख्या
ख्या इत्येव अग्नये अतिकृतये अतिश्रिये अतिभ्रुवे देवदत्ताय। य्वोर्योः प इतिकिं मात्रे दुहित्रे॥
ससखि॥ प इति वर्जिते य्वोः पसुसंज्ञो भवति सखिशब्दं च वर्जयित्वा असखीति मुख्यपधान् सिद्धं मे
तिनिर्दिशाद्धास्थाख्यस्य स्थाख्यस्य च ग्रहणं अग्नये वायवे स्त्र्याख्ययोः पसुसंज्ञो न भवति। न
स्य ग्रहणं कृतये धेनवे सुसंज्ञाविषये न बाध्य आसमिति सुसंज्ञा बाध्यते कृत्यै धेन्वै असखि
तिकिं। सख्युः सख्यौ असखीति पर्युदासोयं तेन योग भवः सखा अतिसखा अतिसखेराग इति अति
सखेः स्व। सखिशब्दादन्यत्वमस्तीति सुसंज्ञा भ द्व इत्यत एव विधि रिति य्वोः प इत्येव पित्रामत्र
सुप्रदेशाः सोर्ङि नेत्येवमादयः। पतिः समासे॥ पतिशब्दः समास एव सुसंज्ञो भवति। प्रजापतिना प्रजापतये
पतिरेव समास इति कस्मान्न नियमः। सर्वोहि द्वंद्वे समासः इति पूर्वनिपातवचनमनर्थकं स्यात्। द्वंद्वे पति रि
ब्रूयात् न ह्यसमासे सुसंज्ञासंभवः। अपि चानेकप्राप्तावेकस्य नियम इति वचनमनर्थकं स्यात्। पद्मद्

गुणपरत्व इति। स इति किं पत्यापत्ये ॥ शेषो घ्यसखि ॥ इति मातिकस्य संज्ञाप्रः घिसंज्ञो भवति भेनां बोद्दायिति
नपा निर्देशः किमर्थः। पुल्लिंगपाठ संज्ञया बाधा यथा स्यात्। मयो जनमग्नेवस्पते। चशब्दः संज्ञानाम
मावेशार्थः॥ घि च भवति यस्मात्प्रत्याभेति तच भवति इह भविनप्य गत इति सुसंज्ञासमावेशः। विश्व
नाच विनरो नाथाचपेके गाच। गाविश्वचम्य ट दइति इच्छचदुवः रिरंभशब्दे नयोगः। स्थाप्यादेशो ति
रेषमासे घिसंज्ञायां। सत्यो धिपूर्वा इति रोरयादेशः सिद्धः सुसंज्ञायां च पूर्वनिपातः अन्यथैकारोकार
भ्यामन्यत्र सावकाशा घिसंज्ञा इकारोकारविषयत्वादनवकाशया सुसंज्ञया बाध्येत। स्कन्दः॥ य इति च ह्रस्वे क:
5 स्फसंज्ञेपरतः मः घिसंज्ञो भवति कुं डा। कुण्डा। स्पर्द्धो नुम्बि धातुपदेशा प्रत्ययगात्याये चतुंस रोरु हल इति
प्रत्ययः अजापनष्टा ए॥ दीः। दीति निर्दिमात्रस्य संज्ञा दीघ्र ह्रस्यसंज्ञो भवति ईहो चके। लिट्परतः सरो
रिजादेरित्यां। शेषं प्राग्वत्कृत्र इत्यत्रोक्तं। ह्रविति पुल्लिंग निर्देशः किमर्थः। इकारोकारविषययामु
संज्ञायां बाधा मा भूत् द्व्योः समावेशो हेपरमयाणीक इति प्यत्र कृ शमो रितिमुसंज्ञा अप कपरूसंज्ञा
प्राप्य अप्राप्य नोनं तस्याप्ये कैकस्य रोरिति पाविधि अपसिद्धः॥ यस्येन दादि गुः। यो हि यस्मात्स्यासत

स्येत्युच्यते। यस्य धोर्मध्ये दोषाख्यः यस्यः तस्मिन्परतः तदादिशब्दरूपं गुसंज्ञं भवति। केवलायाः प्रकृते
र्यः परे स्थानिवद्भावात्तदादित्वं दोग्धि जुहोति करिष्यति कुंडानि। गुकार्यमेविडागमस्त्व। जसि नोऽङ्
इति दोत्वे च। यदिति संज्ञिनिर्देशार्थं अन्यथा तदादेर्निरूप्येत। तथा च त्ये सति पूर्वमात्रस्य गुसं
ज्ञा स्यात्। तत्र को दोषः इह न्यविशत आकरोदिति सगेरडागमः स्यात् यस्येति यच्छेदेन त्यस्य वि
शेषणं किं। अस्यापत्यं इः दैयदत्तिः इं परे त्यत्र आदेरैप् स्यात्। अत्र यस्य स्थानिवद्भावाद्व्यवधानमिति
चेत्। यो ऽनादिष्टादचः पूर्वः तं प्रति स्थानिवद्भावः आदिष्टाच्चैषोऽचः पूर्वो निष्पन्नस्य पदस्य पदा
न्तरेणाभिसंबंधात्। तैत्य। इति ई निर्देशः किमर्थं। यस्य तदादिगुरित्युच्यमाने यस्य त्यः सं
भवति तस्मान्यस्मिन्नपि शब्दे गुसंज्ञा स्यात् तथा च श्रियै इदं श्र्यर्थं भुवे इदं भ्वर्थं। इयुवोः प्रसज्ये
यातां। तदादिवचनं किमर्थं। यत्रानेकस्त्यः संभवति। तत्र तदादेर्गुसंज्ञा यथा स्यात्। करिष्यामि कुंडा
नि स्यां तस्य सन्नुम्कस्य च गुसंज्ञायां यण्यतो दोः। धेकाइत्यिति दोत्वं सिद्धं। गुरिति पुल्लिंगनिर्देशो
ऽपदसंज्ञासमावेशार्थः इह याभव्य इति गुसंज्ञा अयः आदेरैप भसंज्ञा अपः कद्रोरौ त्यपे भुव

इति उंकार इह च मन्तुः पर्यम स्याजुष्कः गुसंज्ञाभ्याम् आदेशे प । स्वादावधे इति पदत्वे पदसंज्ञाश्र
याशिरिति सत्वषत्वानि सिद्धानि नपुंसकलिंगो हि गुसंज्ञा होतुरपत्यं होत्र इत्यत्र मातृकृणा सतीप
दसंज्ञा याबाध्येत ॥ सुप्तिङंतं पदं ॥ नः क्ये इति नियमारंभात् सुप्तिनि प्रत्याहारग्रहणेनैवा
होः । तिङा साहचर्याद्वा ॥ सुबंतं तिङंतं च यथा स्वरूपं पदसंज्ञं भवति । स्तूपकारः पचति पदसंज्ञा
श्रयो रित्यादि विधिः षरिसादेशाविधिश्च भवति ननु सुप्तिङौ स्योर्त्यग्रहणो यस्मात्स तदा
देर्ग्रहणमित्यनेन ग्रहणं किमर्थं । अन्यत्र संज्ञाविधौ नदं तविध्यभावज्ञापनार्थं तेन इष
लीसीत्यत्र क्रांतस्य रूरूवत् इत्यनेन लसंज्ञानास्तीति दांतस्यतोऽतस्तत्विधि ईषदकारापे
रुषा न भवति । इह च कुमारी गौरितराभ्यां दी रू इत्यनेन नदांतस्य रू संज्ञा नास्तीति रू रूपेत्यादि
नामादेशोऽपि न भवति पदमिति न पानिर्देशोऽभसंज्ञार्थं धायपास्यादित्यवमर्थः । अन्यथा राज्ञः राज
स्व इत्यत्र भसंज्ञाश्रयमनोऽत्वं पदसंज्ञाश्रयं नत्वं च स्यात् । पदप्रदेशाः पदस्येत्येवमादयः ॥ नः क्ये ॥ क्य
इति क्यच् काङ् क्यषामविशेषग्रहणं क्ये परे नांतस्य पदसंज्ञा भवति राजानमिच्छति राजीयति राजेवा

चरति राजायते अचर्मचर्म भवति चर्मायत्वे पदत्वे सति नत्वमिदं । नत्वं सुधिधि स्त्रु कौ इति नियमादन्यत्र
सिद्धमिति चर्मीत्वं दीर्घ कृदृ ईनदीत्वं च भवति लोपे त्वस्या अयमिति पदत्वे सिद्धे नियमार्थमिदं नांतमेव
क्यपदसंज्ञं भवति नान्यत् वाच्यति स्वच्यति कुत्वं न भवति नालं क एवेति विपरीतो नियमो नाशंकनीयः
अकारादिति कोनत्व प्रतिषेधाज्ज्ञायते पदत्वे हि नत्वमाप्नोति ॥ सिति ॥ सिति त्यपरतः पूर्वपदसंज्ञं भवति
भवतो यं भवदीयः भवतश्च ठक्सा विति वत्स प्रभ इति पदसंज्ञायां बाधितायां पुनरारंभः । एवं कु
र्णो अस्यास्तीति ऊर्णायुः । ऊर्णाहं शुभं अपि शुभंयुरिति युस् यस्य प्रत्ययेनित्वं भवति अहंयुः अहंयुः शुभंयुः शु
भंयुः वा पदांतस्येति परस्य विकल्पः ॥ स्यादावधे ॥ अघ इति प्रतिषेधाद्यायाः स्यस्यसो [illegible] हरांत्यादौ घव
र्जिते परतः पूर्वपदसंज्ञं भवति । राजभ्यां राजभिः राजत्वे राजता अघ इति किं राजानौ राजानः यद्येवं
राजेत्यत्रापि प्रतिषेधः स्यात् । नैवं राजकोऽध इति पर्युदासोयं धादन्यत्र पदसंज्ञा विधीयते धेतु पूर्वे
ण भविष्यति यद्येवं सुवाचौ सुवाचः इत्यत्रानर्वतिनो विभक्तिमध्यस्य पदत्वं प्राप्नोति । अस्तु नाहि य
स्य प्रतिषेधः राजेत्यत्र अकारादिति प्रतिषेधाज्ज्ञायते सोपदसंज्ञा भवति स्वमप्यघ इत्यनेन इस्य -

स्यादेविधेः प्रतिषेधोयंसुपाचौ सुपांच इत्यत्र पूर्वेण प्राप्तिरस्त्येव कर्तव्यो यत्नः। उत्तरपदत्वे चापदादि
विधौ लुग्ग्रहणं न भवतीति ॥ यचिभं ॥ स्वादावध इति वर्तते यकारादावजादौ च प्रत्यये पूर्वं भसंज्ञं भवति
गार्ग्यः वात्स्यः दाक्षिः प्लाक्षिः। पूर्वेणापदसंज्ञा प्राप्ता भत्वाद्यस्येति चेत्युक्तं नभोंगिरोमनुषां वत्युप
संख्यानं नभसा तुल्यं वर्तते इति नभस्वत् अंगिरस्वत् मनुष्वत् वृषण्वस्वश्वयोर्भसंज्ञेति केचित्। वण
वृषण्वसुः वृषण्वसुः वृषणश्वः ॥ मत्वर्थे त्सौ ॥ मत्वर्थे प्रत्यये परतः सकारांतं तकारांतं च भसंज्ञं भवति। त
पयस्वी यशस्वी विन्नस्मायामेधास्रजो इति विन् मतो विशेषणत्वेपि मत्वर्थे ग्रहणं ग्रहणार्थं यथा देते शालो वद
पेदिना भानीयेनामित्युक्ते देवदत्तो विशेषणात् अनेनापि यदि पेदिनः सोपि भानीयते भस्वान् विद्युत्वान् मरु
त्वान् स्तावितिकिं राजवद्ध्वं ॥ कारके ॥ कारक इत्येतदधिकारः यदित ऊर्ध्वमनुक्रमिष्यामः कारक
इत्येवं तद्वेदितव्यं कारकं निर्वर्तकं हेतुर्यस्य क्रियायाः कार्यकपाधेयः कारक इति निर्देश एकत्वेऽपि
पर्मी पुंजात्यपेक्षं एकवचनं सोऽत्राधानिर्देशः कारके ध्रुवमपाये तदपादानं यः कर्मणोऽपि योर्थः स संप्रदानमि
त्यादियोज्यं ॥ ध्रुवमपाये ध्रुवमपादानं ग्रामादागच्छति स्वर्गाद्युतो हति। अपायक्रियायाः ग्रामो-

१० पिनिर्वर्त्तकः देवदत्तोपि ध्रुवत्वाद्ग्रामोपादानं कारक इति किं वृक्षस्य पर्णं पतति कुड्यस्य पिंडः पतितेः
अपायक्रियायाः निवर्त्तकत्वेन वृक्षः कुड्यं च न विवक्षिते अकथिते च अपादानादिभिरकथिते च
कारके कर्मसंज्ञं भवति आचार्यं धर्मं पृच्छति । कारक इति किं आचार्यस्य शिष्यं धर्मं पृच्छति । आचार्यस्य
शिष्यविशेषणत्वादकारकत्वं यदा कारके चाकारके च सर्वं कथितमात्मनेपादि इति मित्यर्थः । तदिदं प्रत्यु म
दाहरणं । अस्मिन्कोलिंगेन मिति व्याख्यानेकारकमेव लभ्यते । एवं विशेषु कारकाभिधानं अपादानादीनां ग्र
हणं । अपाये ध्रुवमपादानं । धीर्बुद्धिः प्राप्तिपूर्वको विश्लेषोपायः । धियाकृतोऽपायः धियपायः
धीप्राप्तिपूर्वको विभाग इत्यर्थः धीग्रहणो ह्यसतिकायप्राप्तिपूर्वकस्यापायः प्रतीयेत धीग्रहणेन
आ सर्वः प्रतीयते ध्रुवमविचलमवधिभूतं तस्मिन्नपाये साध्ये यद्ध्रुवं तदपादानसंज्ञं भवति ग्रामादागच्छति ।
ग्रामो देवदत्तेनानुपतनीति ध्रुवः अपायोऽपायाद्ग्रागपि ग्रामः अपायेपि ग्राम एव देवद
त्तस्यापायेः ग्रामग्रहणेन नग्रहणेत इति ग्रामो ध्रुवः एवमश्वाद्धावतः पतितः गच्छतः सार्थाद्वहीनः
देवदत्तो जिनदत्ताद्गागतः । मेषोपरस्परतोपसर्पनः [illegible] रोजायते गंगा हिमवतः प्रभवति ।

इह ग्रामान्नागच्छतीति पूर्वमपादानसंज्ञा पश्चात्प्रतिषेधः धियापायस्याविवक्षणात् किं अधर्माज्जुगुप्स
ते प्रेक्षापूर्वकारी । दुःखहेतुरधर्म इति बुद्ध्या संप्राप्त्यैव ततो निवर्तते इति अपादानत्वं एवमधर्माद्वि
रमति प्रमाद्यति धर्माद्धर्माद्बिभेति चौरेभ्यस्त्रायते । अध्ययनात्पराजयते । नशक्नोतीत्यर्थः यवेभ्यो गां
वारयति अकार्यात्सुतं वारयति कूपादन्धं वारयति । उपाध्यायादन्तर्धत्ते । भयं संचिंत्य निवर्त्तते
इत्यर्थः । विवक्षातः कारकाणि भवंति । उपाध्यायादधीते । उपाध्यायाद्गृह्णाति । अविवक्षायां नटस्य
शृणोति ग्रंथिकस्य शृणोति ध्रुवमिति किं । अरण्ये बिभेति नात्र भयावधिभूतमरण्यं किं तर्हि चौ
राः तथा निर्देशः । किमर्थः वक्ष्यमाणाभिः संज्ञाभिः बाधा यथा स्यात् धनुषा विध्यति पुंलिंगपाकर
णसंज्ञया बाधा करणस्य कांस्यपात्र्यां भुंक्ते । पुल्लिंगात् अधिकरणसंज्ञैव धनुर्विध्यतीति कर्तृसंज्ञा इह गां दोग्धि पयः
इति परत्वात्कर्मसंज्ञा अपादानप्रदेशाः कायाऽऽदानस्त्येवमादयः ॥ कर्मणोपेयः संप्रदानं ॥ उपप्
योगे ङे यत्कृते उपेय इति भवति । कर्मणा य उपेयोऽर्थः तत्कारकं संप्रदानसंज्ञं भवति उपाध्यायाय
गां ददाति । देवाय बलिं प्रयच्छति । कर्मणेति किं । गत्वा उपाध्यायमुपैति संप्रदानमित्यर्थसंज्ञाकरणा- ८

त्ददात्यर्थानां धनोद्रव्येणाकर्मणाउपेयोर्थः संप्रदानमितिनेनेह नभवति देवदत्तस्य चपेटां ददा-
ति मित्रस्य कार्यं कथयति अजां नयति ग्रामं सम्यक् संप्रदानमिति चाश्रितं तेनेह न भवति । पुनः
पृष्ठं ददाति रजकस्य वस्त्रं ददाति राज्ञो दंडं ददाति । इह तर्हि कथं श्राद्धाय निगृह्णते । युद्धाय संनह्य- ग
ति निपठते ब्राह्मणेभ्यः तादर्थ्यात् सिद्धं । अथवा कथंचिद्विवक्षितभेदाभिः संदर्शन प्रार्थना
ध्यवसायक्रियाभिः क्रियाभिव्याप्यमानो कर्मनयोपेयत्वात्संप्रदानत्वं । तेनेहापि भवति रोचते दे-
वदत्ताय मोदकः । स्वदते देवदत्ताय मोदकः स्वदते देवदत्ताय मोदकः पुष्पेभ्यः स्पृहयति मित्रा
य कथयति मित्राय क्रुध्यति मित्राय द्रुह्यति मित्राय ईर्ष्यति । मित्रायासूयति । मित्राय कुप्यति
कोपादन्यत्र क्रुधादीनां प्रार्थनादिभिः क्रियाविशेषैर्भेदो न विवक्षित इति क्रियायाः कर्मव्यपदेशो ना
स्ति । भार्यामीर्ष्यति औषधं द्वेष्टि । प्राप्तुमुपलंभते नेत्यर्थभेदः देवदत्ताय शपते ह्नुङ् आत्मनिह्नवे भेदः ।
मित्राय ह्नुते । अत्र मित्रं ह्नुते । राधीक्ष्योर्दैवालोचने । पुत्राय राध्यति । पुत्राय ईक्षते । अन्यत्र पुत्रस्य रा
ध्यति पुत्रमीक्षते । पञ्चमस्याऽपूर्वः श्रोतोनिर्ध्यपगमे वर्तेन । देवदत्ताय प्रतिशृणोति । अनुप्रति-

पूर्वस्य गृणाति ः यदि कथयितुः प्रोत्साहनं वक्ते ते । आचार्याय अनुगृणाति । अर्ध्वर्यवे प्रतिगृणाति । इदमे
दम्भेदविवक्षा देवदत्ताय श्लाघते देवाय प्रणमति । देवं प्रणमति गत्यर्थानां चेष्टायामसंप्राप्ता उभे यथा ग्रा
माय गच्छति ग्रामं गच्छति । ग्रामाय व्रजति । ग्रामं व्रजति । चेष्टायामिति किं । मनसा पाटलिपुत्रं गच्छति । अ-
संप्राप्ताविति किं । पंथानं गच्छति । भार्यां गच्छति । अन्यत्राभेदविवक्षैव । कटं करोति । ओदनं पचति । शा
स्त्रं पठति । सनौ अभ्रुक्रुधिद्रुहोः मित्रमभिक्रुध्यति । मित्रमभिद्रुह्यति । सिद्धिरनेकांतादित्यतो भेदाभेदा
भयविवक्षा प्रत्येतव्या । परेषामपि प्रतिपत्तिगौरवं तुल्यं । क्रिया याव्याप्यत्वमिदं कृच्चनेति दुर्बोध्यं ॥ धारे
रुत्तमर्णः ॥ १२ ॥ ऋणे उत्तमः उत्तमर्णः निपातनात्सिद्धिः । धारयते रुत्तमर्णो योर्थः तत्कारकं संप्रदानसंज्ञं भव
ति । देवदत्ताय गां धारयति । उत्तमर्णा इति किं । देवदत्ताय शतं धारयति दरिद्रः । परिक्रयणं ॥ परिक्रीयते अ
नेनेति परिक्रयणं तत्कारकं संप्रदानसंज्ञं भवति । शताय परिक्रीतः सहस्त्रस्य परिक्रीतः । साधकतमत्वात्करणसंज्ञा
प्राप्ता ॥ ॥ साधकतमं करणं ॥ क्रियायाः प्रसिद्धये नसाधकं साधकतमं तत्कारकं करणसंज्ञं भवति । दानेन भोगं यथा
सुरूपं ध्यानेन मोक्षं तपसश्च सिद्धिं । सत्येन वाक्यं प्रशमेन पूजां वृत्तेन जन्मानुमुपैति मर्त्यः । नम त्वहणं किमर्थं । य-

थारूपप्रस्तावे अभिरूपाय कन्या देयेत्युक्ते अभिरूपतमायेति गम्यते एवमिहापि कारकाधिकारात् । अ
कारके तावत्त्रि नोस्तीति साधकं करणमित्युक्तेपि साधकतममिति गम्यते । तदेतत्तमग्रहणं ज्ञापकमन्यत्र
तमग्रहणेन विना प्रकर्षो न लभ्यते । तेन आधारोधिकरणमित्यनेन मुख्यामुख्ययोरधिकरणत्वं सिद्धं ति
लेषु तैलं । गंगायां घोषः । साधकतमस्यापि च करणसंज्ञां आहनुर्विध्यतीति भवति पुल्लिंगनिर्देशः कि
मर्थः परिक्रयणमित्यनवकाशाया संप्रदानसंज्ञाया बाधा मा भूत् । शतेन परिक्रीतः । वाचनात्सापि भव
ति । शताय परिक्रीतः दिवः कर्म इत्यत्र च समावेशो यथा स्यात् । अक्षैर्दीव्यति ॥ दिवः कर्म ॥ ॥ दिवः
साधकतमं कारकं कर्मसंज्ञं भवति । अक्षान् दीव्यति । शलाकादीव्यतीत्यत्र पानिर्देशात्करणत्वमपि ।
आधारोधिकरणम् ॥ आध्रियन्तेस्मिन् क्रिया इत्याधार इदमेवाधिपालनमधिकरणं नः आधारो य
त्कारकमधिकरणसंज्ञं भवति । यद्येवं कर्तृकर्मणोरधिकरणसंज्ञाप्रसङ्गस्तदाश्रितत्वात्क्रियायाः । एवं
तर्हि कर्तृकर्मणोः क्रियाश्रययोः धारणादाधारोभिप्रेतः पूर्ववत्तमग्रहणेन ज्ञापितं गौणस्याप्याधार
स्याधिकरणत्वं । कर्तृकर्मणोः सत्यपि क्रियाधारत्वे अनवकाशत्वात्कर्तृकर्मसंज्ञे भविष्यतः । भेदविव

क्रियायामधिकरणत्वमपि प्रधानक्रियायादेवदत्तेनवर्त्तते विक्लेदनं तंदुलेषु औपश्लेषिकवैषयिकाभिव्यापक
इत्यपि आधारस्त्रिविधः प्रोक्तः कटाकाशतिलेषु च ॥ औपश्लेषिकः । कटे आस्ते । स्थाल्यां पचति । वैषयिकः
आकाशे शकुनयः । गंगायां घोषः गुरौ वसति यदधीनायस्य स्थितिः स तस्याधारः । अभिव्यापकोवि
भागाप्रतीतिः तिलेषु तैलं दधिनि सर्पिः । अधिकरणप्रदेशाः ईवधिकरण इत्येवमादयः ॥ कर्माधिशी
ङ्स्थासां ॥ अधिपूर्वाणां शीङ् स्था आस् इत्येषामाधारो यस्तत्कारकं कर्मसंज्ञमेव भवति ग्राममधिशेते
पर्वतमधिशेते । पर्वतमधितिष्ठति प्रसादमध्यास्ते । एवकारः पुल्लिंगाधिकरणसंज्ञासमावेशनिवृत्त्य
र्थः कर्मप्रदेशाः कर्मणीवित्येवमादयः ॥ । वसोन्पाध्याङः । अनु । उप । अधि । आङ् । इत्येवं पूर्वस्य वसते
राधारो यः तत्कारकं कर्मसंज्ञं भवति । ग्राममनुवसति । गिरिमुपवसति । गृहमधिवसति । वनमावसति । अभिनिविशश्च
इह कथं ग्रामे उपवसति भोजननिवृत्तिं करोतीत्यर्थः । अत्रापि त्रिरात्रादेराधारस्य कर्मत्वं प्रतीयते ॥ अभि
नि इत्येवं पूर्वस्य विशते राधारो यः तत्कारकं कर्मसंज्ञं भवति । ग्राममभिनिविशते गेहमभिनिविशते च
कारात् । क्वचिदधिकरणसंज्ञापि भवति यथा संज्ञापरिषच्चाभिनिविशते । अर्थे पाभिनिविष्टः कल्याणा

५२ १।४।४९।

भिनिवेश॥ कर्त्तुरीप्स्यं॥ कर्त्ता क्रियया यदाप्यते तत्कारकं कर्मसंज्ञं भवति। कर्तृग्रहणादाप्तग्रहणात्सामर्-
थ्यात्क्रियालभ्यते। तत्कर्म॥ प्राप्यं विषयभूतं च निर्वर्त्यं विक्रियात्मकं कर्तुः क्रियया आप्यमीप्सिता-
नीप्सितेतरत्॥ आप्यत्वसामान्यं सर्वत्र विद्यते॥ प्राप्यं। ग्रामं गच्छति। आदित्यं पश्यति। विषयभूते
नैत्रे वेदमधीते हिमवंतं शृणोति निर्वर्त्यं घटं करोति ओदनं पचति विक्रियात्मकं। काष्ठानि दहति।
घटं भिनत्ति। ईप्सितं गुडं भक्षयति ओदनं भुंक्ते अनीप्सितं ग्रामं गच्छन्। व्याघ्रं पश्यति। कंटकान्मर्-
दाति। अनुभयं ग्रामं गच्छन्। वृक्षमूलान्युपसर्पति। कर्त्रेति किं। माषेष्वश्वं बध्नाति। अश्वेन कर्म-
णाभीप्सिताः क्रियया माषाः नामाप्यानां कर्मसंज्ञा माभूत। अथ सर्वाणि कारकाणि कर्त्रीप्स्यंत इति क-
र्मसंज्ञा प्राप्नोतीति नैष दोषः। सर्वेषु कारकेष्वाप्येषु आप्तग्रहणसामर्थ्यादाप्यतमे संप्रत्ययः। ते-
न करणादिषु न भवति। पयसा ओदनं भुंक्ते। इह कथं कर्मत्वं गेहं प्रविशतीति आधारस्याविवक्षया॥

१।४।५१॥
अकथितं च॥ अकथितमसंकीर्तितमपादानादिभिः विशेषकथाभिरकथितं च यत्कारकं तत्क-
र्मसंज्ञं भवति। अकथितमप्रधानमितिरप्यमाश्रो इह देवदत्तान् गां याचत इत्यप्रधानत्वात् अपा

दानसंज्ञाकर्मसंज्ञया बाध्येत । दुहियाचिरुधिप्रछिभिक्षिचिञामुपयोगनिमित्तमपूर्वविधौ । ब्रुविशा
सिगुणेन च यत्सचते तदकीर्तितमाचरितं कविना ।। दुहि ।। गां दोग्धि पयः गोः कारकमपादानत्वे
ना संकीर्तितमपायस्याविवक्षितत्वात् । गोः पयोग्यत्वेन सिद्धं कर्मत्वमिति चेत् । परिगणनार्थमिदं वक्त
व्यं । इह माभूत् । नटस्य शृणोति श्लोकं । याचि ।। ।। माणवकं गां याचते । याचनमात्रेणापायस्यावि
वक्षितत्वात् । रुधि ।। गामवरुणद्धि व्रजं । सतोप्याधारस्याविवक्षा अनुदरा कन्येति यथा ।। प्रछि ।। आ
चार्यं धर्मं पृच्छति । प्रश्नमात्रेणापायस्याविवक्षा भिक्षि ।। ।। देवदत्तं गां भिक्षते ।। चिञ् ।। ।। वृक्षम
वचिनोति फलानि । उपयोगनिमित्तं प्रयोगनिमित्तं । अथवा उपयोगो दुग्धादि तन्निमित्तं गवादि इहा
पि तर्हि स्यात् । पाणिना कंसपात्र्यां दोग्धि पाशपादिकमप्युपयोगनिमित्तमित्याह । अपूर्वविधौ यस्य
पूर्वो विधिर्नोक्तः । इह तु पूर्वमेव करणसंज्ञाधिकरणसंज्ञा च विहिता ।। ब्रुविशास्योर्गुणेन च क्रियया
कर्मणा वा यत्सचते संबध्यते तदकीर्तितमित्युक्तमाचार्येण ।। ब्रुवि माणवकं धर्मं ब्रूते । शास्ति ।। माण
वकं धर्ममनुशास्ति माणवकस्य संप्रदानत्वेनाविवक्षा । अकथितमिति किं । देवदत्तात् । गां याचते । व-

कारो नुक्तसमुच्चयार्थः । तेन कालभावाध्वगंतव्याः कर्मसंज्ञा ह्यकर्मकाणामिति वक्तव्यं कालः । मासमास्ते । संव
त्सरं वसति । भावः । गोदोहं स्वपिति । अध्वा च गंतव्यश्चेति । इत्ययाविशेषणत्वं क्रोशमास्ते । क्रोशं स्वपि
ति । देशोपि कर्मसंज्ञ इति केचित् कुरूनास्ते कुरून्स्वपिति । अथ नीवहिहरतिकृषिजयत्यादयः । द्विक
र्मका उपलभ्यंते तेषां कथं द्विकर्मकत्वं । प्रधानाप्रधानकर्मणोः सामान्येनाप्यत्वात् । अजां नयति
ग्रामं । भारं वहति ग्रामं । जिनदत्तो ग्रामं भारं हरति । शाखां कृषति ग्रामं । देवदत्तो जिनदत्तं शतं जयति
देवदत्तो ग्रामं शतं दंडयति । अयं तु विशेषः । प्रधानकर्मण्यभिधेये लादीनाहुर्द्विकर्मणां । अप्रधा
ने दुहादीनां । एयते कर्तुश्च कर्मणः । नीयते अजा ग्रामं । उह्यते भारो ग्रामं । ह्रियते भारो ग्रामं । कृष्यते
शाखा ग्रामं । जीयते जिनदत्तः शतं । दंड्यते जिनदत्तः शतं । अप्रधाने कर्मणि दुहादीनां । दुह्यते गौः प
यः । याच्यते माणवको गां । अवरुध्यते गौर्व्रजं । पृच्छ्यते माणवको धर्मं । भिक्ष्यते देवदत्तो गां । अवचीयते
वृक्षः फलानि । उच्यते माणवको धर्मं । शिष्यते माणवको धर्मम् । एयंते कर्तुश्च कर्मणा इति । उत्तरसूत्रे
ण अण्यंतावस्थायां यः कर्ता ण्यंतावस्थायां कर्मतामापन्नः प्रयोज्यः । तस्याभिधाने लादीनाहुः । बोध्य

ते माणवकः धान्यं । गम्यते माणवको ग्रामं । भोज्यते माणवक ओदनं । आस्यते माणवको मासं । अध्याप्य
ते माणवको जैनेन्द्रं । ननु शब्दायते बुधबुध्यन्तवाच्याप्रक्रि यथा प्रेषणाध्येषणाकरुणा यायदा ण्यन्तेन त्वधा
नेकर्मअवयवक्रियायायदा ण्यन्ते तद प्रधानमेवं च सति प्रधानकर्मण्यभिधेयत्वादेना हुरित्यनेनेव
सिद्धत्वादनर्थमिदं ण्यन्ते कर्तुश्च कर्मणा इति । नानः येकं समुच्चयार्थमेतत् । प्रधानेकर्मणि लादयो
भवंत्यप्रधानेच । तेन बोध्यते माणवकं धर्मः । भोज्यते माणवकं ओदनः । अध्याप्यते माणवकमोदनः ।
अध्याप्यते माणवकं जैनेन्द्रः । अकर्मकाणां गत्यर्थानां च प्रधानस्यैवकर्मणि लादयः । आस्यते माणव
को मासं । आस्यते माणवको गोदोहं । गम्यते माणवको ग्रामं । प्राप्यते माणवको ग्रामं ॥ ज्ञाबुध्यदर्थ
धेरणिकर्तारौ ॥ १।२।२२॥ ॥ ज्ञार्थानां गम्यर्थानां दृश्यर्थानां धीनां च धूनामण्यन्तानां यः कर्त्ता स णौ सतिक
र्मसंज्ञो भवति ॥ ज्ञार्थानां ॥ जानाति माणवको धर्मं ज्ञापयति माणवकं धर्मं । बुध्यते माणवको धर्मं । बोध
यति माणवकं धर्मं पश्यति माणवको ग्रामं दर्शयति माणवकं धर्मं । बुध्यते माणवको धर्मं बोधयति माणव
कं धर्मं । पश्यति माणवको ग्रामं दर्शयति माणवकं ग्रामं । गम्यर्थानां ॥ गच्छति माणवको ग्रामं । गमयति

माणवकोग्रामं । यापयति माणवकं ग्रामं । अद्यर्थानां ॥ भुंक्ते ओदनं माणवकः । भोजयति माणवक
मोदनं । अश्नाति माणवकः ओदनम् । आशयति माणवकमोदनं ॥ धी मानास्ते माणवकः । आसयति मा
णवकं शेते माणवकः । शाययति माणवकं । अत्रापि पूर्ववत् णिजंतवाच्यधात्किपयामेव धात्वध्येषणा ता
लक्षणया आप्यत्वात्कर्मसंज्ञा सिद्धा । यद्यपि स्वातंत्र्यमाप्यत्वे चास्ति तथापि कर्मचेत्स्यं धारणालक्षः व
ते संज्ञा न भवतीति एवं सिद्धे नियमार्थमिदं । एतेषामेव णौ कर्त्ता ण्यंते कर्मसंज्ञो भवति नान्येषां । प
चत्योदनं देवदत्तः पाचयत्योदनं देवदत्तेन । अणि कर्तेति किं । गमयति देवदत्तो जिनदत्तं तमन्यः प्र
युंक्ते गमयति देवदत्तेन जिनदत्तं । नयत्यादयः प्रापणार्था न गत्यर्थाः तेनेह कर्मसंज्ञा न भवति । अ
जां नयति देवदत्तः । नाययति देवदत्तः । नाययति देवदत्तेन । भारं वहति वाहीकः । वाहयति वाहीके
न । यदा गत्यर्थता संभवस्तदा भवति कर्मसंज्ञा यद्वहंति बलीवर्दा यवान् वाहयंति बलीवर्दान् यवान् प्र
वहत्युदकं देवदत्तः प्रवाहयत्युदकं देवदत्तमद्यर्थेषु आदिखाद्योः प्रतिषेधो वक्तव्यः । अत्ति देवदत्तः ।
आदयति देवदत्तेन । खादति देवदत्तः । खादयति देवदत्तेन । अथवा पूर्वमद्यर्थे कार्ये मदेन भवतीति

वक्तव्यं अधिकरणेनविधिमुक्ता। आदयते माणवकं तस्य ग्रंथादि तिममप्पिनभवति। भक्षेरहिं
सार्थः कर्मसंज्ञो न भवतीति वक्तव्यं। भक्षयति पिंडीं देवदत्तः भक्षयति पिंडीं देवदत्तेन अहिंसार्थस्येति किं।
भक्षयति बलीवर्दी यवं। भक्षयति बलीवर्दं यवं। अत्र हिंसास्ति वनस्पतिकायानां प्राणित्वात्। प्रकृते
नकर्मणां अकर्मकाइत्यत्र ग्रहणे तेन विषयं देशकालादिकर्मणां कर्मकाणां कर्मसंज्ञो भवति। आस्ते मासं देवद
त्तः। आसयति मासं देवदत्तं। आस्ते गोदोहं देवदत्तः। आसयति गोदोहं देवदत्तं। आस्ते क्रोशं देवदत्तः
आसयति क्रोशं देवदत्तं॥ शब्द॥ शब्दकर्मभावेन क्रियाभावेनच येषांधुर्वर्ते तेषां ण्यन्तस्य कर्तृणां
कर्मसंज्ञो भवति। शब्दकर्मणां शृणोति देवदत्तः शब्दं। श्रावयति देवदत्तं शब्दं। उपलभते देवदत्तः शब्दं उ
पलंभयति देवदत्तं शब्दं। अधीते माणवकस्तर्कं। अध्यापयति माणवकं तर्कं। शब्दक्रियस्य जल्पति दे
वदत्तः जल्पयति देवदत्तं विलपति देवदत्तः विलापयति देवदत्तं चशब्दोनुक्तसमुच्चयार्थः तेन ह्वयत्यादि
षु न भवति ह्वयति देवदत्तः ह्वाययति देवदत्तेन क्रंदति देवदत्तः। क्रंदयति देवदत्तेन॥ हृक्रोरन्यतरस्यां॥ हृक हृ
इत्येतयोरण्यंतयोर्यः कर्ता स ण्यंतयोर्वा कर्मसंज्ञो भवति। नवेतिनिर्देशात्प्राप्तेचाप्राप्तेच विकल्पः॥

[illegible]

[illegible]

सप्रतिषेधस्यानित्यत्वं ॥ नि: ॥ अधिकारोयमाध्योत्ते इत्यत: प्राक् पानित ऊर्ध्व मनुक्रमिष्याम: निसं
ज्ञास्ते वेदितव्या: । वक्ष्यतिचादिरसत्वे। चाह । अह एवनिरिति पुल्लिंगानिर्देश: किमर्थ: निति संज्ञा
भ्यां समावेशो यथा स्यात् निप्रदेशा: । निरेकाजनाङि.त्येवमादय: ॥ चादिरसत्वे ॥ सीदत: अस्मिन्लिं
गसंख्ये इति सत्वं लिंगसंख्यावद्द्रव्यमित्यर्थ: चादयो निसंज्ञका भवंति । नचेत्सत्ववर्त्तते । च । वा । ह ।
अह । एवं । नूनं शश्वत् । सूपत् । कूपत् । कुवित् । नेत् । चेत् । चण् । कच्चित् । यत्र । नह । हंत । माकिम् । नकि
म् । माङ् । ङ.कारो माङि. लुङीति विशेषणार्थ: । आङि. निमाशब्दे मा भवत् । मा भविष्यति । नमन्
अकारो नञिति विशेषणार्थ: । नहि । चाच । त्वाक । ननु च । त्वै । नुवै । न्वै । भुवै । रै । वै । श्रौषट् । वौषट् । वष
ट् । स्वाहा । स्वधा । ॐम् । तथा । हि । खलु । किल । अथ । अवस । स्म । अस्मि । अ । इ । उ । ऋ । ऌ । ए । ऐ । ओ । औ
उम् । सुम । आदह । आतेका । वेला । पां । मात्रायां । यावत् । यथा । किम् । यत् । तत् । यदि । पुरा । धिक् । हे । है
प्याट् । प्याट् । उताहो । आहो । अथो । अधो । मानो । ननु । नाना । मन्ये । असि । ब्रूहि । हि । नु । नु । इति
इव । वत । चेवत । एवं । आ । आं । शं । हिकम् । हिरुक् । सुभां । सुकं । नुकं । नहिकं । कृतं । सत्यं । अद्धा ।

सप्रतिषेधस्यानित्यत्वं ॥ निः ॥ अधिकारो यं प्राग्धोस्ते इत्यतः प्राक् यानित ऊर्द्ध्वमनुक्रमिष्यामः निसं
ज्ञास्ते वेदितव्याः । चादिरसत्वे च । वाह । अह एव निरिति पुल्लिंगनिर्देशः किमर्थः । गिसिसंज्ञा
भ्यां समावेशो यथा स्यात् निप्रदेशाः । निरेकाजनाङ् । इत्येवमादयः ॥ चादिरसत्वे । सोदनः अस्मिन्लिं
गसंख्ये इति सत्वं लिंगसंख्यावद्द्रव्यमित्यर्थः । चादयो निसंज्ञका भवंति । नवेत्सत्वचनेत्वे । च । वा । ह ।
अह । एवं । नूनं । शश्वत् । सपत् । कूपत् । कुवित् । नेत् । चेत् । चण् । कच्चित् । यत्र । नह । हंत । माकिः । नकि
न् । माङ् । ङकारो माङि लुङिति विशेषणार्थः । आङिति माशद्बे मा भवत् । मा भविष्यति । न । नञ् ।
अकारो ञिति विशेषणार्थः । नहि । वाच । त्वाक । ननु । चाते । नु वै । न्वै । भुवै । रै । वै । श्रौषट् । वौषट् । वषट् ।
स्वाहा । स्वधा । ॐम् । तथा । हि । खलु । किल । अथ । अवस्मास्म । अपि । अ । इ । उ । ऋ । लृ । ए । ऐ । ओ । औ
उञ् सुञ् आदह । आतेकाधिकायां । मात्रायां । यावत् । पथा । किम् । यत् । तत् । यदि । पुरा । धिक् । हे । हो
पाट् । प्याट् । उताहो । आहो । अथो । अथो । मा । नो । ननु नाना । मन्ये अमि । ब्रूहि । हि । नु । लु । इति ।
इव । वत । धावत । एवं । आ । अं । ओं । हि । कम् । हिरुक् । शुभं । सुकं । नुकं । नहिकं । कन्तं । सत्यं । अद्धा ।

नोहि।सुधा।नवेत्।जातु।कथं।कूले।कुत्र।अपि।आदह।आव।हा।भो।अन्वित्।वास्। सवेल दिष्ट्या
पशु।युगपत्।फट्।सह।अनुषक्।ताजक्।नाजकु।अंग।पुन।अये।कुव अरे।अथवा।वट्।वेट्।वाट्।
ऊं।खवल्किल्।मयो।इप्।कीम्।सीम्।गिविभक्तौ स्वर प्रतिरूपकाश्च।प्रतिरूपकाः अवदत्तं।नि
ईतमित्यादौ।दुर्नीतं।दुर्नय इति।गत्वं न भवति।असत्व इति किं।अस्यापत्यमिरिति।।प्रादि।।प्रा
दयो निसंज्ञा भवेत्यसत्वे।प्र।परा।प।सम।अन्व।व।निर्।दुर्।वी।अध।पो।प्यति।स्व।द्।अभ।यप्र।प्रति।ना।सह।उप।रूपित
व्याः पर्युपयोरपि लङ्कृणामत्र।असत्व इत्येव।विमानीनि विप्रः।पराजयति सेनापत्यध्वरणामुत्तरा
र्धं प्रादीनामेव गिसंज्ञा यथा स्यात्।चादीनां माभूत्।उत्तरत्र प्रादिग्रहणे क्रियमाणे।अक्रिया
योगे निसंज्ञा न स्यात्।अप्येवं नु मन्यसे।अप्येवं किल नन्।। क्रियायोगे गिः।। क्रियायोगे प्रादयो
गिसंज्ञा भवति।प्रणमति।परिणायकः।गेरसेपि विकृते रिति णत्वं सिद्धं।क्रियायोग इति किं।प्र-
गतानायकाऽस्मादेशात्।प्रनायको देशः।नन्वात्रापि क्रियाक्षिप्योगग्रहणासामर्थ्यात् यदि क्रिया
युक्ता स्तं प्रति गिनिसंज्ञा भवति।गमि क्रियायाचात्र योगः।मरुद्ध्यस्योपसंख्यानं।मरुत्तः।गेस्तोच इ-

तिअनञ्जेनत्वेपुपसंख्यानसामर्थ्याल्ल्यादेशः। प्रलाम्बदाबोदन्निभ्योणुइति निर्देशादर्द्विषयेअनोगि
त्वं। तिरोंतर्द्धाविति निर्देशादेतः शब्दस्यापिकादिविषये॥ तिः॥ तिसंज्ञाश्च प्रादयोभवंति क्रियायोगे।
प्रकृत्यप्रभृत्यतिसंज्ञायांतिकुप्रादयइति षसः। प्यक्तिवाक्यंकृद् इति प्यादेशः। पुष्टिंगागिसंज्ञासमावि
शंति। अभिषिच्य। प्रराम्यषत्वणत्वे सिद्ध्योगविभागः किमर्थः। उत्तरत्र तिसंज्ञैव यथास्यात्। गिसंज्ञा
माभूत्। इह। ऊरीस्यादिति गिप्रादुर्भावप्रत्ययेरिति षत्वेस्यात्॥ च्वि डाजूर्यादिः। च्व्यंतोडाजंतः ऊर्याप्र
भृतयश्च शब्दाः क्रियायोगेतिसंज्ञाभवंति। अप्शुक्लं शुक्लं कृत्वा शुक्लीकृत्य डाच। अपटपटन् कृत्वा।
पटपटाकृत्य कृभ्वस्तियोगे च्विडाचौ विहितौ तत्सहाचर्यादूर्यादीनामपि कृभ्वस्तिभिरेवयोगेतिसं
ज्ञाभवति। ऊर्यादिषुच्यर्थोनसंभवति ऊरीकृत्य। उररीकृत्य। ऊरीभूय उररीभूय। ऊरीउररीशब्दा
वंगीकरणेविस्तारेच। पांपीशब्दोविध्वंसेमाधुर्येसकरुणविलापेच। ताली आताली शब्दौवर्णोघिताली वैरू
रूप्ये। धूसीशब्दः कांतौ। वाधांपांचू शाकलात्। सकला। ध्वंसकला। भ्रंसकला एते हिंसायां। गुलगुधाशब्दो
द्वौ पीडायां। सजूःसहार्थे। फलू। फली। विक्ली। आक्ली। एते विकारे। आलंबी। आलोष्ठी। केवासी केवाली।

सेवाली। वर्षाली।। मसमसा। मसमसा। एते हिंसार्थाः। औषट्। वौषट्। वषट्। स्वाहा। स्वधा। एते दानार्थाः।।
चादिषु च पाठात्। अक्रियायोगे पि निसंज्ञा। प्रादुस्। अस्। आविस्। प्रादुःकृत्य। प्रादुर्भूय। अद्दाय। आवि
र्भूय। आविः। प्रादुः। स्यात्। इत्यादौ च पक्षे ते। तस्य वारु औति करोति योगे तिसंज्ञा विकल्प्यः। आविष्कृत्य आ
विष्कृत्वा।। अनितौ च अनुकरणं।। ।।अव्यक्तो व्यक्तो वा शब्दो नुक्रियते तेन त्यनुकरणं। अनितिपरम नु
करणं क्रियायोगे तिसंज्ञं भवति। खाट्कृत्य। पटत्कृत्य। अनितौ इति किं। खाटिति कृत्वा निरष्ठीवत्
सर्वस्य स्वाधोः प्राक्प्रयोगः सविधिश्च प्रसज्येत। आदेः षः स इत्यत्र सुञ् सु मित्रु वरुष्याम् यनीनां प्रतिषे
ध उक्तः।। सदसती आदरानादरयोः। आदरः। संभ्रमः। अवज्ञानमोदासीन्यं वानादरः। सच्छब्दः आदरानाद
र इत्येतयोरर्थयोस्तिसंज्ञो भवति। आदरे सत्कृत्य। अनादरे असत्कृत्य। अनादर इत्यर्थनिर्देशात्। सच्छ
ब्दस्य तदन्ते विधिरिष्टः। तेनेहापि भवति। परमसत्कृत्य। तिसंज्ञायां निसंज्ञा समावेशः। निसंज्ञस्यासत्यस्य ला
क्षिसंज्ञा। आदरानादरयोरिति किं। सत्कृत्वा कांडं गतः। विद्यमाने कृत्वेत्यर्थः।। भूषापरिग्रहे लमं
तः।। ।।अलमंतरित्येतौ शब्दौ भूषायामपरिग्रहे चार्थे यथासंख्यं तिसंज्ञौ भवतः। अलंकृत्य भूष-

यित्वेत्यर्थः ॥ अंतर्हत्य मध्ये हत्वेत्यर्थः ॥ अपरिग्रह इति किं अंतर्हत्वा । अंतर्हत्वा त्वा निवचनेद्दिन
मूषिकां गतः । पञ्चाशं कृत्वेत्यर्थः परिग्रहीत्यर्थस्तु तेनांतर्धा विनिद्रापकादनः शब्दस्य गतिसंज्ञापि अइ किवि
धित्वेपुप्रयोगदर्शनादंतर्द्धा अंतर्द्धिः । अंतर्द्धेत्यपि ॥ कणेमनसी श्रद्धाप्रतीघाते ॥ श्रद्धाप्रतीघातो भिलाषनिवृ
त्तिः कणेमनः शब्दौ श्रद्धाप्रतीघातेर्थे गतिसंज्ञौ भवतः कणेशब्दः ईबंसप्रतिरूपको निपातः अभिलाषनिवृ
त्तौ वर्त्तते । मनःशब्देपि तस्मिं हर्येवेति हतार्थः कणेहत्य भुंक्ते श्रद्धाप्रतीघात इति किं तंदुलानां कणे हत्वा
गतः । मनो हत्वा गतः चेतो हत्वेत्यर्थः ॥ पुरोव्ययं ॥ पुरस् अस्तमित्येतौ कि संज्ञौ क्रियायोगे गति
संज्ञौ भवतः । पुरःशब्दः पूर्वाधरावराणां पुरधवाशीत्यत्र साधितः अस्तंशब्दो अनुपलब्धौ वर्त्तते पु
रस्कृत्य गतः । अस्तंगत्य पुनरुदेति निमः पुरसोस्यादिति सत्वं किमिति किं । पूः पुरो । पुरः कृत्वा गतः ।
अस्तं कृत्वा कांडं गतः ॥ ॥ गत्यर्थवदेच्छ ॥ गतिसंज्ञे तो अच्छशब्दो निपातः गत्यर्थे वदतौ च गतिसं
ज्ञो भवति । अच्छगत्य । अच्छगम्य अभिवाम इतिवाम स्यरवे । अच्छोद्य अच्छशब्दोऽदर्थे आभिमुख्ये
च वर्त्तते किं इत्येव । उदकमच्छं गत्वा ॥ अदोनुपदेशे ॥ अवचनात्मिकाम मतिपत्तिरनुपदेशः अदः श्रा-

द्रो अनुपदेशे गतिसंज्ञो भवति। अदः कृत्य अनुपदेशे इति किं अदः कृत्वा गतः। एतत्कृत्वा गत इति पर
स्य कथयति॥ तिरोन्तर्द्धौ॥ ॥ तिरः शब्दो अंतर्द्धाने गतिसंज्ञो भवति। तिरोभूय। अंतर्द्धौ इति किं तिरो भू
त्वा स्थितः॥ तिर्यग्भूत्वा स्थित इत्यर्थः॥ वा कृञि॥ तिरः शब्दो अंतर्द्धौ कृञि वा गतिसंज्ञो भवति। प्रा
प्ते विकल्पः तिरस्कृत्य तिरः कृत्वा तिरसोन्यतरस्याम् इति सत्वं अंतर्द्धौ इत्येव तिरः कृत्वा काष्ठं गतः॥ उपाजे
न्वाजे॥ उपाजेन्वाजे॥ उपाजे अन्वाजे इत्येतौ प्रतिरूपकौ निपातौ कृञि वा गतिसंज्ञौ भवतः। उपाजेकृ
त्य उपाजे कृत्वा। अन्वाजेकृत्य। अन्वाजे कृत्वा॥ दुर्बलस्य भग्नस्य वा बलाधाने कृत्य इत्यर्थः॥ साक्षादा
दिः॥ वेति वर्त्तते साक्षात्प्रभृतीनि शब्दरूपाणि कृञि वा गतिसंज्ञानि भवंति। च्विडाजर्थादिरित्यतो मंडूक
प्लुत्या च्विग्रहणमथ परमनुवर्त्तते तेन च्व्यर्थे गतिसंज्ञा विकल्प्यते। साक्षात्कृत्य साक्षात्कृत्वा। मिथ्या
कृत्य मिथ्याकृत्वा। यदा च्विः कृत्य यते तदा च्विडाजर्थादिरित्यनेन नित्यं गतिसंज्ञा भवति। साक्षात्। मिथ्या।
चिंता। भद्रा। रोचना। लोचना। अमा। आस्था। श्रद्धा। प्राध्वा। प्राजर्या। प्राजरुहा। बीजर्या। बीजरुहा। संस
र्या। अर्थे। लवणं। उष्णं। शीतं। उदकं। आर्द्रं। गतिसन्नियोगे लवणादीनां मकारांतत्वं निपात्यते। अग्नौ

वसे। विकसने। विकम्पने। निर्हने। अनेनोऽभ्यत्ययः। ईवंतमतिरूपकाः निपातनं वा। वेनिव्यवस्थितविभा
षानुवर्तनात्। लवणादीनां[illegible]तानां मकारौकारनिपातनं न भवति। लवणीकृत्य वशीकृत्य नमस्। प्रादुर्
उ. विः। शाद्वौ कृपौ दित्यपि पठ्यते तयोः कृभ्विविकल्पार्थ इह पाठः॥ मनस्युरस्यनत्याधाने॥ ॥मनसि उर
सि शब्दौ ईवंतप्रतिरूपकौ निपातनेव च। अत्याधानमुपश्लेषः॥ मनसि उरसि इत्येतौ अनत्याधाने र्थे कृ-
ञि वा गतिसंज्ञौ भवतः। उरसिकृत्य उरसिकृत्वा। मनसिकृत्य मनसिकृत्वा निश्चित्येत्यर्थः। अनत्याधान
मिति किं। उरसि कृत्वा पाणिं शेते॥ ॥मध्ये पदे निवचने॥ ॥अनत्याधानमिति वर्तते मध्ये पदे निवचने इ
त्येते शब्दाः कृञि वा गतिसंज्ञा भवंति। अनत्याधाने एकारान्तत्वं पूर्ववद् द्रष्टव्यं। मध्येकृत्य। मध्येकृत्वा पदेकृत्य पदेकृत्वा
निवचने इति वचनाभावे वर्तते। निवचनेकृत्य निवचनेकृत्वा। अनत्याधान इत्येव। हस्तिनः पदे कृत्वा ह
स्तिमाले॥ ॥हस्ते पाणौ स्वीकृतौ नित्यं॥ ॥हस्ते पाणौ इत्येतौ शब्दौ स्वीकृतार्थे कृञि नित्यं गतिसंज्ञौ भवतः
हस्तेकृत्य पाणौकृत्य भार्यां कृत्वेत्यर्थः। स्वीकृताविति किं हस्ते कृत्वा कार्षापणं गतः। नात्र दारस्वीकारः॥
पुनक्तिग्रहणं नित्यार्थं॥ ॥प्राध्वं बंधे॥ प्राध्वमिति मकारांतः किमंतः शब्दः आनुलोम्ये वर्तते। प्राध्वंशब्दः

कृन्मितिसंज्ञो भवति । बंधो निमित्तं चेत् । प्राध्वं कृत्वा । बंधनिमित्तमानुलोम्यमिह प्राध्वं करणं बंध इति किं ।
प्रगतमध्वानं प्राध्वं कृत्वा शकटं गतः निकु प्रादम इति षसः गेरध्वन इति संतो कारः । मुनिपादोक्तपरि
भाषानाश्रयणो प्रत्युदाहरणमिदं ॥ ॥ जीविकोपनिषदाविवे ॥ ॥ उपनिषद्रहस्यं । जीविका उपनिष
दित्येतौ शब्दौ विवशाद्रस्यार्थे कृन्मितिसंज्ञौ भवतः । जीविकां कृत्य । उपनिषत्कृत्य जीविकामिव उप
निषदमिव कृत्वेत्यर्थः । इवार्थ इति किं । जीविकां कृत्वा गतः ॥ ॥ प्राध्वोते ॥ । प्रयोगानियमार्थं । नेमि
तिसंज्ञाः धोः प्रागेव प्रयोक्तव्याः । तथा चैवोदाहृतं नेति वचनं किमर्थं । अनंतराणां नीनां गीनां
च ग्रहणार्थं ॥ ॥ लोम ॥ नवानां लकाराणामनुबंधा पामेलु इति सामान्येन निर्देशः । लादेशो मसं
ज्ञो भवति । मिप् । वस् । मस् । सिप् । थस् । थ । तिप् । तस् । झि । आत्मनेपानिर्देशाः पुल्लिंगपादि संज्ञया वा
धा पयास्यात् । समावेशोऽपि ह्याक्रमते आदित्याः संज्ञस्य तदुक्तक्रमो भेदोऽत्र । गमेरिणमे इति
इस्रा मसज्ञेन आनशिम संज्ञासावकाशानि । मिङ्वक्ष्यमाणाभिरस्मदादिभिः संज्ञाभिः बाध्यते नाबा
कनीयं अस्मो वेभ्य इति वचनेज्ञापकं मिङ् मसंज्ञापि भवतीति ॥ इडानंदः ॥ इडितिप्रत्याहारः । इडि-

त्यतः प्रभृति आकडो ङकारे वा इड्‌ आनश्च दसंज्ञो भवतः । दद्‌ । दद्धिहि । मद्धिहि । धास्‌ । आथां । ध्वांत ।
आतां । कङ । आन इति आनोगर्‍ एते ॥ मिङ् त्रिशो अस्मद्युष्मदन्याः ॥ मिङो मि संज्ञानि दस संज्ञा
नि वर्णी त्रिशो त्रिशो वचनानि अस्मद्युष्मदन्य इत्येवं संज्ञानि भवंति । मिप्‌ । वस्‌ । मस्‌ । इत्यस्मद्‌ । सिप्‌
थस्‌ । थेति युष्मद्‌ । तिप्‌ । तस्‌ । अंत्यन्यः । दानामपि । इट्‌ । वहि । महीत्यस्मद्‌ । थास्‌ । आथां । ध्वमि
ति युष्मद्‌ । त । आतां । अङ्‌ इत्यन्यः मिङ इति किं । अनुत्तरस्य दस्य मस्य च गतहस्ताणार्थे । त्रिशा इति
संख्यैका द्वौ पराधामि निषधास्‌ ॥ ॥ साधने स्वार्थे ॥ अस्मदादयो अन्यर्थ संज्ञा अनुवर्तंते । क-
र्तृत्वाधिकृत्यादि विशेषणा मिबादयो विहितास्तन्नियमो यं । स्वस्यार्थः स्वो अर्थो वा स्वार्थः तस्मिन्‌
स्वार्थे साधने अस्मादादयो वेदितव्याः । अस्मत्पदस्यार्थे साधने अस्मत्त्रिकं युष्मत्पदस्यार्थे साधने युष्म
त्रिकं । आभ्यामन्यस्य पदस्यार्थे साधने । अन्यत्रिकं भवति । अस्मदाद्यर्थानां साधनत्वे सतीति नियमो तेन
स्मदादि पदानामनुप्रयोगो सत्यसतिच अस्मदादयो भवति । अहं पचामि । आवां पचावः वयं पचामः । प
चामि । पचावः । पचामः । त्वं पचसि । युवां पचथः । यूयं पचथ । पचथः । पचथ । स पचति । तौ पचतः । ते पचं पचंति

ति। पचति। पचतः। पचंति एवं द्विधावपि योज्यं। भावे अस्मद्युष्मदर्थयोरभावात्। भावस्य चाभ्यामन्यत्वा
त् एकत्वाच्च तस्मिन् साधने अन्यस्यैव भवति। आस्यते भवता। ग्लायते भवता। पत्रास्मदाद्यर्था युगपत्सा
धनेन न कद्युच्यते। पूर्वनिर्णयेन यस्मद्वयः। अत्र किं अस्मदर्थसाधने अस्मद्भवतोन्यव धियते। आहोस्वि
८ स्वयं साधने अस्मद्भवतीति। उभयथाप्यदोषः सर्वेषां नियतत्वात् ननु द्विर्नीयेपपदेत्त्वपाकुर्वाणो नेत्य
त्रदोषः। नैयत्यिकापेक्षया नियमो न साधनापेक्षया॥ ॥प्रहासे मन्यवाचि युष्मन्मन्यतेरस्मदेकवच्च॥
मन्य इति। मन्यतेरेकदेशः श्रूत इति याक्। मन्यो वाक्यस्य प्रहासस्य तस्मिन्मन्यवाचि प्रहासे गम्यमाने
युष्मद्भवति। मन्यतेश्चास्मद्भवति। एकवच्चास्मद्युष्मदोर्यथापार्थोपसमारंभः। एहि मन्ये रथेन यास्य
सि न हि यास्यसि यातस्ते पिता। एहि मन्यसे रथेन यास्यामीति यासि। एवं एहि मन्ये ओदनं भोक्ष्यसे न हि
न हि भोक्ष्यसे भुक्तः सोतिथिभिः द्वित्वबहुत्वयोरप्येकवद्भावो भवति। एतं मन्ये रथेन यास्य
थेति। प्रहास इति किं एहि मन्यसे ओदनं भोक्ष्य इति। सुष्ठु मन्यसे साधु मन्यसे॥ एकद्विबहुष्वेकशः॥ ॥यान्य
स्मद्युष्मदन्यसंज्ञानोसंज्ञितेनोपात्तानि षट्कान्यतिततन्यैकशः एकद्विबहुष्वेवसंज्ञानि भवंतीत्येकः वि

[illegible]

वत्तिनि बहुष्वेवं शेषेषु त्रिकेषु योज्यं। अस्मदादिसंज्ञाः पुल्लिंगाः। एकादिभिः सह सप्तविंशतिः॥ सुपश्च॥
त्रिशः इति वर्त्तते। सुपश्च त्रिकाः। एकद्विबहुसंज्ञा भवंत्येकशः। सु इत्येकशः। सु इत्येकः। औ इति द्विः। जसि
ति बहुः। एवं शेषेषु त्रिकेषु नेयं। उभयत्र चशब्दः साधने स्वार्थे इत्यस्यानुकर्षणार्थः। एकार्थे साधने एको
ऽपि प्रभवति। द्व्यर्थे द्विर्वेसु। बहुत्वे बहुत्वम्। एवं मिङ्क्षु सुप्सु च योज्यं। ननु च। साधने स्वार्थ इत्येतस्मिन्नुपप
द्यते यतः साधनं कारकं क्रियानिवर्त्तकं क्रियाचध्र्यर्थः धोश्च मिङो विहिता इति साधनवाचित्वोपपन्नेः।
सुपस्तु क्रियावाचिनो धातोरप्रयोग विधीयंत इति तत्र साधने स्वार्थ इत्येतन्न घटते नैष दोषः। अक्रिया
वाचिनोऽपि विधीयमाना सुपः क्रियावाचिपदांतरमाकांक्षंति पदांतरवाच्यायाः क्रियायाः साधनभावो
पपत्तेः सुप्स्वपि साधने स्वार्थे इत्ययं व्यवहारो युज्यते। देवदत्तः पचति देवदत्तौ पचतः देवदत्ताः पचंति।
यत्रापि क्रियापदं न प्रयुज्यते। वृक्षः वृक्षौ इति तत्राप्यस्तिर्भवंतीपरः संनिहितः तदपेक्षया व्यवहारः। इमि
ऽः सामान्येन धुमात्राद्विधीयंते सुपश्च प्रत्ययानां पंचरेतानयः नियमो यं। अन्यः नियमो यं नियमो
वा एकार्थे एव साधने एको भवति। द्व्यर्थे एव साधने द्विर्भवति। बहुत्वे एव बहु

र्थं वर्त्तीतित्यनियमः एकार्थसाधने एक एव भवति । द्व्यर्थे द्विरेव भवति । बह्वर्थे बहुरेव भवतीत्यर्थनियमः ।
स्यान्नियमपक्षे सुपोके इति वचने ज्ञापकं । एकत्वादीनामभावे प्युल्पर्यंते के: सुप इति । अर्थनियमप
क्षे एकत्वादयो नियताः स्युर्न व्यभिचरंति ॥ पुनरनियताः एकत्वादीनामभावे व्यतिकरेणा
संज्ञकेभ्यो भवंति । तत्र सुपो इत्युपिकृते सुबंतं पदं भवति ॥ विभक्ती ॥ ॥ सुप इत्यनुवर्त्तते त्रित्री इति
च सुपो त्री त्री त्री वचनानि विभक्तीसंज्ञानि भवंति । सु औ जस् इति त्रिको वर्गः तस्य विभक्ती इति संज्ञा
त्रिकसमुदाये संज्ञा विहिता अवयवे व्युपचर्यते । एवं सर्वत्र सुपां त्रिके सुप्योऽन्यं । मिङां विभक्ती संज्ञा
यां न गुणो नापि दोषः विभक्ती शब्दस्य कथं सिद्धिः विपूर्वाद्भजेः । क्तिच् क्तौ च संज्ञायामिति क्तिच् । तस्मा
त्क्तिकारादत्ते इति ङीविधिः । महासंज्ञाकरणमुत्तरार्थं ॥ ॥ तासामाद्यरात्तद्दलचः ॥ ॥ त-
स्य विभक्ती शब्दस्य हलः अयथ्या । आकारयकारपराः तासां विभक्तीनां यथासंख्यं संज्ञा भवंति । वा । रप ।
भा । अप्र । का । ता । ई । विति । एताः संज्ञाः । सुप स्त्रिय इति चानुवर्त्तते । सु औ जस् इति था । अम् औट् ।
शसिति इप् । टा भ्यां भिसिति भा ॥ ॥ ङे भ्यां भ्यसिति अप् । ङसि भ्यां भ्यसिति का । ङस् ओस् आमिति

ता। डि। ॐसस्पृचितिर्ई प्। तासां ग्रहणं सुखिभक्त्युपादानार्थं सपूर्वापावायाइत्येवमादयो निर्देशाः सौत्राः॥
॥इत्यभयनंदिविरचितायां महावृत्तौ प्रथमस्याध्यायस्य द्वितीयः पादः समाप्तः॥ ॥समर्थः प
दविधिः॥१ ॥परिभाषेयं समर्थपदाश्रयत्वात् समर्थः पदसंबंधी विधिः पदविधिः सर्वः पदविधिः
सर्वः पदविधिः समर्थो वेदितव्यः समर्थानां पदानां विधिर्वेदितव्य इत्यर्थः द्वे सामर्थ्ये एकार्थीभावः प-
रस्परव्यपेक्षा च। तत्र समासविधिनामधुद्दीद्धिषु स्वभावतः एकार्थीभावः। सामर्थ्यमन्यत्र व्यपेक्षा एका
र्थीभावे संगतार्थः संसृष्टार्थो वा समर्थः व्यपेक्षायां संबद्धार्थः। संप्रेक्षितार्थो वा समर्थः। वस्तूनि। इ सक्षि
तानीतपतितगतात्यस्तैः। धर्मश्रितः। धर्मश्रितः समर्थग्रहणं किं। व्याचष्टे मुनिर्द्धर्मं श्रितः श्रियो गु
रुकुलं। अत्र व्यपेक्षा नास्ति। भागुणो त्रयर्थे नानेः। मद्रेन पटुः मद्रपटुः समर्थग्रहणं किं। दंतो भ्रमतिमदे
न। पटुः शाक्येषां। अपूर्दर्थाथवा रूढिहिल मृस्वरा स्नैतेः रथापदारू रथपदारू। समर्थग्रहणं किं। काभीतिः
संसाराद्भयं संसारभयं। समर्थग्रहणं किं। ध्यानीनिःक्रामति संसाराद्भयमरतये। तामोरुमार्गः समर्थग्र
हणं किं। अनेन सुखं मोक्षस्य मार्गः स्वर्गस्य व्रतं ता इ ष्कौ ड्डैः। अक्षेषु शौंडः। समर्थग्रहणं किं मूढः सक्तोऽक्षे

शुण्डौ पिबति पानागारे। पदग्रहणं किं। तिष्ठतु दध्यशान त्वं शाकेन। तिष्ठतु कुमारीच्छत्रं हर देवदत्त। वर्ण
विधौ समर्थपरिभाषानावतरतीत्यामंनर्यमात्रेरा यशादेशः तुग्विधिश्च भवति। आपदस्येत्यत्र पदग्र
हणं विभाज्यस्य विशेषणमिति पदविधिरयं न भवतीति विकल्पेन तुक्॥ सः॥ स इत्ययमधिकारो वेदितव्यः
आपादपरिसमाप्तेः समुदायवाक्यपरिसमाप्तिश्चाश्रीयते। तेन पदसमुदाये संज्ञा न प्रत्येकमिति। इत्य
तिपावच्चायावद्ग्रसा दर्पेनयाव द्रमतिपीनं भोजयनित्यत्वात्सविधिः अव्ययपदविग्रहे सार्थः प्रदर्श्य
ते ये ये रुद्राइतिवा सापाययथा शब्दः सर्वनपुंलिङ्गनिर्देशः किमर्थः। हादिभिर्विशेषसंज्ञाभिः समावेसाप
थास्यात्॥ ॥सुसुपा॥ सुबंतं सुबंतेन सह सो भवतीत्येतदधिकृतं वेदितव्यं। आपादपरिसमाप्तेः वक्ष्यति
द्वन्द्वश्चित्येत्यादि धर्मो श्रित्यः रुरु रांचेदं सुबंतं सुबंतेन सह सो भवति। यदृच्छया न किंतोपस्थिते त्विब्रोकरतो
वायमिष्यते। तेन काकतालीयादयः सिद्धाः। तथा हि यदृच्छया तालस्य पतनं संनिहितं काकस्य च तत्र किंत
उपस्थितः स काकस्तेन तालेन पतता हतः। अत्र पेक्षनयोः सामान्येन समः। काकश्च तालं च काकतालं
तदिव काकतालीयं। इवे प्रतिभकृताविव्यधिकृत्य कुत्सा ग्रवाछ इति चानुवर्तमाने। सा हि ष्यादिति छोभव